(xi) अब मन्त्र के ग्यारहवें प्रकार, **भूतों का उदय** कहते हैं - जब दोनों नासापुटों के नीचे तक श्वास चलता हो तब **जलतत्व** का उदय समझना चाहिए, जो शान्ति कर्म में सिद्धिदायक होता है । नाक के मध्य में सीधे दण्ड की तरह श्वास गति होने पर **पृथ्वीतत्व** का उदय समझना चाहिए, यह स्तम्भन कार्म में सिद्धिदायक होता है । नासा छिद्रों के मध्य में श्वास की गति होने पर **आकाशतत्व** का उदय समझना चाहिए, जो विद्वेषण में सिद्धिदायक है । नासापुटों के ऊपर श्वास की गति होने पर **अग्नितत्व** का उदय समझना चाहिए ॥ ३३-३५ ॥

तदा कर्मद्वये सिद्धिर्मारणे च वशीकृतौ।
प्राणेतिर्यग्गतौ ज्ञेय उच्चाटे मारुतोदयः॥ ३६॥

समित्कथनम्

दूर्वायाः समिधः शान्तौ गोघृतेन समन्विताः।
दाडिमप्रसुवो होमे वश्येजाघृतसंयुताः॥ ३७॥
मेषीघृताक्ताः समिधः स्तम्भे राजतरूद्भवाः।
धत्तूरसमिधो द्वेषे अतसीतैलसंयुतः॥ ३८॥
चूतजाः कटुतैलाक्ता उच्चाटनविधौ मताः।
कटुतैलयुताः शस्ता मारणे खदिरोद्भवाः॥ ३९॥

मालाकथनम्

शंखजा पद्मबीजोत्था निम्बारिष्टफलोद्भवा।
प्रेतदन्तभवा वाहरदोत्था खरदन्तजा॥ ४०॥

समिध आह – **दूर्वाया** इति । दाडिमेति । वश्यार्थहोमे अजाघृताक्ता दाडिमसमिधः ॥ ३७ ॥ स्तम्भने मेषीघृताक्ता राजवृक्षसमिधः ॥ ३८॥ उच्चाटे सर्षपतैलाक्ता आम्रसमिधः ॥ ३९ ॥ मालामाह – **शंखजेति** । स्तम्भने निम्बफलजा। अरिष्टः फेनिलस्तत्फलजा वा माला विधेया । उच्चाटने वा हरदोत्था अश्वदन्तजा॥ ४०॥

ऐसे समय में मारण एवं वशीकरण दोनों कार्यो में सफलता मिलती है । श्वास की गति तिर्यक् (तिरछी) होने पर **वायुतत्त्व** का उदय समझना चाहिए जो उच्चाटन क्रिया में शुभावह होता है ॥ ३९ ॥

(xii) अब मन्त्र के बारहवें प्रकार, **विभिन्न समिधाओं को** कहते हैं - शान्ति कार्य में गोघृत मिश्रित दूर्वा से, वश्य में बकरी के घी से मिश्रित अनार की समिधा से, स्तम्भन में भेंड़ी का घी मिला कर अमलतास वृक्ष की समिधा से, विद्वेषण में अतसी के तेल से मिश्रित धतूरे की समिधा से, उच्चाटन में सरसों के तेल से मिश्रित आम की वृक्ष की समिधा से तथा मारण में कटुतैल मिश्रित खैर की लकड़ी की समिधा से होम करना चाहिए ॥ ३७-३९ ॥

(xiii) अब तेरहवें प्रकार में **माला की विधि** कहते हैं - शान्ति आदि षट्कर्मों में शंख की शान्ति में, कवलगद्दा की वश्य में, नीबूं की स्तम्भन में, नीम की विद्वेषण में, घोड़े के दाँत उच्चाटन में तथा गदहे के दाँत की जप माला मारण कर्म में उपयोग करना चाहिए ॥ ४० ॥

जपमालाः क्रमाज्ज्ञेयाः शान्तिमुख्येषु कर्मसु ।

मालागणनाप्रकारः

मध्यमायां स्थितां मालां ज्येष्ठेनावर्तयेत्सुधीः ॥ ४१ ॥
शान्तौ वश्ये तथा पुष्टौ भोगमोक्षार्थके जपे ।
अनामांगुष्ठयोगेन स्तम्भनादौ जपेत्सुधीः ॥ ४२ ॥
तर्ज्जन्यङ्गुष्ठयोगेन द्वेषोच्चाटनयोः पुनः ।
कनिष्ठाङ्गुष्ठसंयोगान्मारणे प्रजपेत्सुधीः ॥ ४३ ॥

मणिसंख्याकथनम्

अष्टोत्तरशतं संख्यातदर्द्धं च तदर्द्धकम् ।
मणीनां शुभकार्ये स्यात्तिथिसंख्याभिचारके ॥ ४४ ॥

शान्त्यादिकर्मणि अग्निकथनम्

शान्तिर्वश्यं लौकिकाग्नौ स्तम्भनं वटजेऽनले ।
द्वेषः कलितरूत्पन्ने शेषे पितृवनस्थिते ॥ ४५ ॥

मालायां गणनाप्रकारमाह – **मध्यमायामिति** । ज्येष्ठेनाङ्गुष्ठेनावर्तयेत् भ्रामयेत् ॥ ४१–४३ ॥ मालामणिसंख्यामाह – **अष्टोत्तरशतमिति** । तदर्धं चतुष्पञ्चाशत् । तदर्धकं सप्तविंशतिः । एषा त्रिविधा माला शुभे कार्या । अभिचारे स्तम्भनादौ पञ्चदशमणियुक्ता माला ॥ ४४ ॥ अग्निमाह – **शान्तिरिति** । वटजे वटकाष्ठान् मथनोत्पादिते । कलितरूद्भवे बिभीतकजाते । शेषे उच्चाटन–मारणकर्मणि श्मशानवह्नौ होमः ॥ ४५ ॥

शान्ति, वश्य, पूष्टि, भोग एवं मोक्ष के कर्मों में मध्यमा में स्थित माला को अंगूठे से घुमाना चाहिए । स्तम्भनादि कार्यों के लिए बुद्धिमान साधक को अनामिका एवं अंगूठे से जप करना चाहिए । विद्वेषण एवं उच्चाटन में तर्जनी एवं अंगूठे से जप करना चाहिए तथा मारण में कनिष्ठिका एवं अंगूठे से जप करने का विधान है ॥ ४१-४३ ॥

अब प्रसङ्ग प्राप्त **माला की मणियों की गणना** कहते हैं - शुभकार्य के लिए माला में मणियों की संख्या १०८, ५४ या २७ कही गई है, किन्तु अभिचार (मारण) कर्म में मणियों की संख्या १५ कही गई है ॥ ४४ ॥

(xiv) अब **चौदहवें प्रकार वाले अग्नि के विषय में** कहते हैं -

शान्ति और वशीकरण कर्म में लौकिक अग्नि में, स्तम्भन में बरगद के काठ की बनी अग्नि में, विद्वेषण में बहेड़े की लकड़ी की अग्नि में तथा

प्रसंगात् काष्ठकथनम्

शुभे कर्मणि बिल्वार्कपलाशक्षीरवृक्षजैः।
अशुभे विषवृक्षाक्षैर्निम्बधत्तूरशेलुजैः ॥ ४६ ॥
काष्ठैः प्रदीपयेदग्निं होमकर्मणि मन्त्रवित्।

अग्निजिह्वापूजनम्

वह्नेर्जिह्वां सुप्रभाख्यां शान्तिकर्मणि पूजयेत् ॥ ४७ ॥
वश्य कार्ये हि रक्ताख्यां स्तम्भने कनकाभिधाम्।
विद्वेषे गगनां जिह्वामुच्चाटेप्यतिरक्तिकाम् ॥ ४८ ॥
कृष्णां तु मारणे चार्चेद् बहुरूपां तु सर्वतः।

विप्रभोजनसंख्याकथनम्

भोज्ये संख्याविशेषोऽपि ज्ञेयः शान्त्यादिकर्मसु ॥ ४९ ॥
शान्तौ वश्ये भोजयेत होमाद्विप्रान् दशांशतः।
उत्तमं तद्भवेत्कर्म तत्त्वांशेन तु मध्यमम् ॥ ५० ॥

वह्निप्रसंगात् काष्ठान्यप्याह – **शुभ इति** । शुभे शान्तिपुष्ट्यादौ कर्मणि बिल्वादिकाष्ठैरग्निं प्रज्वालयेत् । अशुभे स्तम्भनादौ विषवृक्षादिकाष्ठैः । विषवृक्षः कुचिला इतिप्रसिद्धः । अक्षो बिभितकः । शेलुः श्लेष्मातकः ॥ ४६ ॥ अग्निप्रसंगादेव कर्मविशेषे वह्निजिह्वापूजामाह – **वह्नेरिति** ॥ ४७ ॥ कनकाभिधा हिरण्या ॥ ४८ ॥ होमप्रसंगात् विप्रभोजनसंख्यामाह – **भोज्ये इति** ॥ ४९ ॥ शान्तिवश्ययोर्होमाद्दशांशेन द्विजानां भोजनमुत्तमम् । होमात् पञ्चविंशांशेन तन्मध्यमम् ॥ ५० ॥

उच्चाटन एवं मारण के प्रयोगों में श्मशानाग्नि में होम का विधान है ॥ ४५ ॥

अग्नि प्रज्वलित करने के लिए समिधाओं के विषय में कहते हैं - शुभ कार्यों में वेल, आक, पलाश एवं दुधारु वृक्षों की समिधाओं से तथा अशुभ कर्मों में विषकृत कुचिला, बहेड़ा, नीबू, धतूरा एवं लिसोड़े की समिधाओं से मान्त्रिक को अग्नि प्रज्वलित करनी चाहिए ॥ ४६ ॥

अब **अग्नि जिह्वाओं का तत्तत्कर्मों में पूजन का विधान** कहते हैं - शान्ति कर्म में अग्नि की सुप्रभा संज्ञक जिह्वा का, वश्य में रक्तानामक जिह्वा का, स्तम्भन में हिरण्या नामक जिह्वा का, विद्वेषण में गगना नामक जिह्वा का, उच्चाटन में अतिरक्तिका जिह्वा का तथा मारण में कृष्णा नामक अग्नि जिह्वा और सभी जगह बहुरूपा नामक अग्निजिह्वा का पूजन करना चाहिए ॥ ४७-४९ ॥

शान्त्यादि कर्मों में ब्राह्मण भोजन के विषय में कुछ विशेषतायें हैं । शान्ति एवं

होमाच्छतांशतो विप्रभोजनं त्वधमं तु तत् ।
शान्तेर्द्विगुणितं विप्रभोजनं स्तम्भने मतम् ॥ ५१ ॥
त्रिगुणं द्वेषणोच्चाटे मारणे होमसम्मितम् ।

विप्रलक्षणम्

अतिशुद्धकुलोत्पन्नाः साङ्गवेदविदोऽमलाः ॥ ५२ ॥
सदाचाररता विप्रा भोज्या भोज्यैर्मनोहरैः ।
पूज्यास्ते देवताबुद्ध्या नमस्कार्याः पुनः पुनः ॥ ५३ ॥
सन्तोष्या मधुरैर्वाक्यैर्हिरण्यादिप्रदानतः ।
अचिराल्लभतेऽभीष्टं गृहीतायां तदाशिषि ॥ ५४ ॥
एनोभिचारकर्मोत्थं नश्यतिद्विजवाक्यतः ।

लेखनद्रव्यकथनम्

चन्दनं रोचनारात्रिर्गृहधूमश्चिताभवः ॥ ५५ ॥

शतांशेनाधमम् ॥ ५१ ॥ विप्रस्वरूपमाह – **अतिशुद्धेति** ॥ ५२ ॥ उक्तब्राह्मणभोजने अभिचारोत्थमेनः पापं नश्यति । तस्मादुत्तमा द्विजा भोज्याः ॥ ५३–५४ ॥ लेखनद्रव्यमाह–**चन्दनमिति** । रात्रिर्हरिद्रा सा स्तम्भने लेखनद्रव्यम् । अष्टविषाणि मारणे । पूर्वोक्तं (२०) यन्त्रतरंगोक्तं लेखनद्रव्यम् ।

वश्य में होम के दशांश संख्या में ब्राह्मण भोजन कराना चाहिए, यह उत्तम पक्ष माना गया है ॥ ४९-५० ॥

होम की संख्या के पच्चीसवें अंश की संख्या में ब्राह्मण भोजन मध्यम तथा शतांश संख्या में ब्राह्मण भोजन अधम पक्ष कहा गया है । स्तम्भन कार्य में शान्ति की संख्या से दूने ब्राह्मण भोजन कराना चाहिए । इसी प्रकार विद्वेषण एवं उच्चाटन में शान्ति संख्या से तीन गुने ब्राह्मणों को तथा मारण में संख्या के तुल्य ब्राह्मण भोजन कराना चाहिए ॥ ५०-५१ ॥

अब **भोजनार्ह ब्राह्मणों का स्वरूप** कहते हैं -

अत्यन्त विशुद्ध कुलों में उत्पन्न साङ्गवेद के विद्वान पवित्र निर्मल अन्तःकरण वाले सदाचार परायण ब्राह्मणों को विविध प्रकार के मनोहर भोज्य पदार्थों से भोजन कराना चाहिए । उनमें देवबुद्धि रखकर पूजन करना चाहिए तथा बारम्बार उन्हे प्रणाम करना चाहिए । मधुर वाणी से तथा सुर्वणादि के दान से उन्हे सन्तुष्ट करना चाहिए । इस प्रकार के ब्राह्मणों द्वारा दिए गए आशीर्वाद के प्राप्त करने से साधक के समस्त अभिचारादि पाप नष्ट हो जाते हैं, तथा

अङ्गारोऽष्टविषाणीति शान्त्यादौ यन्त्रलेखने ।
पूर्वोक्तं लेखनद्रव्यं गृह्णीयात्तदपि ध्रुवम् ॥ ५६ ॥

विषष्टककथनम्

पिप्पलीमरिचं शुण्ठी श्येनविष्ठा च चित्रकः ।
गृहधूमोन्मत्तरसो लवणं च विषाष्टकम् ॥ ५७ ॥

भूर्जपत्रादिलेखनाधारकम्

शान्तौ वश्ये लिखेद् भूर्जे स्तम्भने द्वीपिचर्मणि ।
खरचर्मणि विद्वेषे उच्चाटे ध्वजवाससि ॥ ५८ ॥
नरास्थिनि लिखेद्यन्त्रं मारणे मन्त्रवित्तमः ।
ये त्वाधाराः स्मृता यन्त्रतरङ्गे तेऽपि सम्मताः ॥ ५९ ॥

कुण्डकथनम्

वृत्तं पद्मं चतुष्कोणं त्रिषट्कोणं दलेन्दुवत् ।
तोयेशसोमशक्राणां या तु वाय्वोर्यमस्य च ॥ ६० ॥

तदपि तत्तत्कामनया ग्राह्यम् ॥ ५५–५६ ॥ अष्टविषाण्याह – **पिप्पलीति** ॥ ५७ ॥ लेखनद्रव्यप्रसंगाल्लेखनाधारमाह – **शान्ताविति** ॥ ५८ ॥ * ॥ ५९ ॥ कुण्डान्याह – **वृत्तमिति** । शान्तौ वृत्तकुण्डं पश्चिमे । पद्माकारं वश्ये उत्तरे । स्तम्भने चतुरस्रं पूर्वे । द्वेषे त्रिकोणं नैर्ऋत्ये । उच्चाटे षट्कोणं वायव्ये । मारणेऽर्द्धचन्द्राकारं दक्षिण इत्यर्थः ॥ ६० ॥

शीघ्र ही उसे मनोऽभिलषित पदार्थों की प्राप्ति हो जाती है ॥ ५२-५५ ॥

(XV) अब **लेखन द्रव्य के विषय में** कहते हैं -

चन्दन, गोरोचन, हल्दी, गृहधूम, चिता का अङ्गार तथा विषाष्टक यन्त्र लेखन के द्रव्य कहे गए हैं । यन्त्र तरङ्ग (२०) में पूर्वोक्त द्रव्यादि भी तत्तत्कामनाओं में लेखन द्रव्य कहे गए हैं, वे भी ग्राह्य हैं । १. पिप्पली, २. मिर्च, ३. सोंठ, ४. बाज पक्षी की विष्टा, ५. चित्रक (अण्डी), ६. गृहधूम, ७. धतूरे का रस तथा ८. लवण - ये ८ वस्तुयें विषाष्टक कही गई हैं ॥ ५५-५७ ॥

शान्ति और वश्य कर्म में भोज पत्र पर, स्तम्भन में व्याघ्र चर्म पर, विद्वेष में गदहे की खाल पर, उच्चाटन में ध्वज वस्त्र पर, और मारण में मनुष्य की हड्डी पर, मान्त्रिक को मन्त्र लिखना चाहिए । यन्त्र तरङ्ग (२०) में विविध प्रयोगों में यन्त्र लिखने के जो जो आधार कहे गए हैं वे भी यन्त्राधार में ग्राह्य हैं ॥ ५८-५९ ॥

आशासु क्रमतः कुण्डं शान्तिमुख्येषु कर्मसु ।

स्रुकस्रुवादिकथनम्

सौवर्णौ यज्ञवृक्षोत्थौ स्रुक्स्रुबौ शान्तिवश्ययोः ॥ ६१ ॥
स्तम्भनादिषु कार्येषु स्मृतौ लोहमयौ हि तौ ।

लेखनीकथनम्

हेमजा रूप्यजा जाती सम्भवा लेखनी शुभे ॥ ६२ ॥
वश्ये दूर्वाङ्कुरोत्पन्नास्तम्भनेऽगस्त्यवृक्षजा ।
राजवृक्षभवा वा स्याद्विद्वेषे तु करञ्जजा ॥ ६३ ॥
शुभे कर्मणि रम्याहे लेखनीं रचयेत्सुधीः ।
बिभीतकोत्थितोच्चाटे मारणे तु पुमस्थिजा ॥ ६४ ॥
रिक्तातिथौ कुजदिने विष्टौ तामशुभे पुनः ।

शान्त्यादौ भक्ष्यान्नादिकथनम्

भक्ष्यं च तर्पणं द्रव्यं तत्पात्रमथ कीर्त्यते ॥ ६५ ॥

स्रुक्स्रुवावाह – **सौवर्णाविति** ॥ ६१ ॥ लेखनीमाह – **शुमे शान्तौ** ॥ ६२–६४ ॥ देवताद्येकोनविंशति वस्तूनि शान्त्यादौ निरूप्य पुनरधिकं वक्तुं प्रतिजानीते – **भक्ष्यमिति** ॥ ६५ ॥

(xvi) अब मन्त्र के १६वें प्रकार, **कुण्ड के विषय में** कहते हैं -

शान्ति आदि षट्कर्मों में क्रमशः वृत्ताकार, पद्माकार, चतुरस्त्र, त्रिकोण, षट्कोण और अर्द्धचन्द्राकार कुण्ड का निर्माण पश्चिम उत्तर-पूर्व नैर्ऋत्य वायव्य और दक्षिण दिशा में करना चाहिए ॥ ६० ॥

(xvii-xviii) **स्त्रुवा और स्त्रुची** - शान्ति में सुवर्ण की एवं वश्य में यज्ञवृक्ष की स्त्रुवा और स्त्रुची बनानी चाहिए । शेष स्तम्भनादि कार्यों में लौह की स्त्रुवा और स्त्रुची बनानी चाहिए ॥ ६१ ॥

(xix) अब मन्त्र के उन्नीसवें प्रकार, **लेखनी के विषय में** कहते हैं -

शान्ति कर्म में सोने, चांदी, अथवा चमेली की, वश्य कर्म में दूर्वा की, स्तम्भन में अगस्त्य वृक्ष की अथवा अमलतास की, विद्वेषण में करञ्ज की, उच्चाटन में बहेड़े की तथा मारण में मनुष्य की हड्डी की लेखनी से यन्त्र लिखना चाहिए । शुभ कर्म में साधक को शुभमुहूर्त में अशुभ कार्य में रिक्ता (चौथ, नवमी, चतुर्दशी) तिथियों में मङ्गलवार के दिन तथा विष्टी (भद्रा) में लेखनी का निर्माण करना चाहिए ॥ ६२-६५ ॥

शान्तौ वश्ये हविष्यान्नं स्तम्भने परमान्नकम्।
माषामुद्गाश्च विद्वेषे गोधूमाभ्रंशने स्थलात्॥ ६६॥
मसूरान्नं तथा श्यामा अजादुग्धोत्थपायसम्।
मारणे प्रोदितं भक्ष्यं मन्त्रिणां कर्मकुर्वताम्॥ ६७॥

शान्त्यादौ तर्पणजलपात्रकथनम्

शान्तौ वश्ये हरिद्राक्तं जलं तर्पण ईरितम्।
मरिचाद्यं कवोष्णं तत्स्तम्भने मारणे तथा॥ ६८॥
मेषरक्तान्वितं तोयं विद्वेषोच्चाटयोर्मतम्।
स्वर्णपात्रं तर्पणेस्याच्छान्तौ वश्ये च कर्मणि॥ ६९॥
स्तम्भने मृत्तिकापात्रं विद्वेषे खदिरोद्भवम्।
लोहनिर्मितमुच्चाटे कुक्कुडाण्डं तु मारणे॥ ७०॥

आसनप्रकारः

मृद्वासने समासीनः शान्तौ वश्ये प्रतर्पयेत्।
जानुभ्यामुत्थितः स्तम्भे द्वेषादावेकपात्स्थितः॥ ७१॥

परमान्नकं पायसम् । स्थलाद् भ्रंशने उच्चाटने॥ ६६–७२॥

अब उक्तकर्मों में **भक्ष्यपदार्थों** को, **तर्पण द्रव्यों** को तथा उपयोग में लाये जाने **योग्य पात्रों के विषय में** कहता हूँ -

शान्ति और वश्य कर्म करते समय हविष्यान्न, स्तम्भन करते समय खीर, विद्वेषण करते समय उड़द एवं मूँग, उच्चाटन करते समय गेहूँ तथा मारण करते समय मान्त्रिक को मसूर एवं काली बकरी के दूध में बने खीर का भोजन करना चाहिए ॥ ६५-६७ ॥

शान्ति कर्म में तथा वश्य कर्म में हल्दी मिला जल, स्तम्भन और मारण कर्म में मिर्च मिला कुछ गुनगुना जल तथा विद्वेषण एवं उच्चाटन में भेड के खून से कमकश्रत जल तर्पण द्रव्य कहा गया है ॥ ६८ ॥

शान्ति एवं वश्य कर्म में सोने के पात्र में, स्तम्भन में मिट्टी के पात्र में, विद्वेषण में खैर के पात्र में, उच्चाटन में लोहे के पात्र में तथा मारण में मुर्गी के अण्डे में तर्पण करना चाहिए ॥ ६९-७१ ॥

शान्ति एवं वश्य कर्म में मृदु आसन पर बैठकर तर्पण करना चाहिए । स्तम्भन में घुटनों से उठकर तथा विद्वेषण आदि में एक पैर से खड़े हो कर तर्पण करना चाहिए ॥ ७१ ॥

षट्कर्मणां विधिः प्रोक्त एवं मन्त्रज्ञतुष्टये ।
सम्यक्कृत्वा न्यासजातमात्मरक्षां विधाय च ॥ ७२ ॥

काम्यकर्मोपसंहारकथनम्

काम्यं कर्मप्रकर्तव्यमन्यथाभिभवो भवेत् ।
शुभं वाप्यशुभं वापि काम्यं कर्म करोति यः ॥ ७३ ॥
तस्यारित्वं व्रजेन्मन्त्रो न तस्मात्तत्परो भवेत् ।

काम्यकर्महेतुकथनम्

विषयासक्तचित्तानां सन्तोषाय प्रकाशितम् ॥ ७४ ॥
पूर्वाचार्योदितं काम्यं कर्मनैतद्धितावहम् ।
काम्यकर्मप्रसक्तानां तावन्मात्रं भवेत्फलम् ॥ ७५ ॥

निष्कामभजने फलकथनम्

निष्कामं भजतां देवमखिलाभीष्टसिद्धयः ।
प्रतिमन्त्रं समुदिता ये प्रयोगाः सुखाप्तये ।
तदा शक्तिं विहायैव निष्कामो देवतां भजेत् ॥ ७६ ॥

एवं काम्यं कर्म निरूप्य तत्प्रसक्तिं वारयति – **शुभं वेति** ॥ ७३ ॥ एवं चेत् किमित्युक्तं तदित्यत आह – **विषयेति** ॥ ७४ ॥ पूर्वाचार्योक्तमुक्तम् । तद्वस्तुगत्याहितं न भवति । तत्र हेतुमाह – **काम्येति** ॥ ७५ ॥ * ॥ ७६ ॥

हमने मन्त्र साधकों के सन्तोष के लिए षट्कर्मों (शान्ति, वश्य, स्तम्भन, विद्वेषण उच्चाटन और मारण) की विधि बताई है । सर्वप्रथम विधिवत् न्यास द्वारा आत्मरक्षा करने के बाद ही काम्य कर्मों का अनुष्ठान करना चाहिए । अन्यथा हानि और असफलता ही प्राप्त होती है ॥ ७२ ॥

जो व्यक्ति शुभ अथवा अशुभ किसी भी प्रकार का काम्य कर्म करता है मन्त्र उसका शत्रु बन जाता है । इसलिए काम्यकर्म न करे । यही उत्तम है ॥ ७३-७४ ॥

अब प्रश्न होता है कि यदि काम्य कर्म करने का निषेध है तो इतनी बड़ी विधियुक्त पुस्तक के निर्माण का क्या हेतु है ? इसका उत्तर देते हैं - विषयासक्त चित्त वालों के सन्तोष के लिए प्राचीन आचार्यों ने काम्य कम की विधि का प्रतिपादन किया है **किन्तु यह हितकारी नहीं है** । काम्य कर्म वालों के लिए केवल कामना सिद्धि मात्र फल की प्राप्ति होती है ॥ ७४-७५ ॥

किन्तु निष्काम भाव से देवताओं की उपासना करने वालों को सारी सिद्धियाँ प्राप्त हो जाती है । केवल सुख प्राप्ति के लिए प्रत्येक मन्त्रों के जितने

वेदोक्तकर्मकरणस्योत्कृष्टता

वेदे काण्डत्रयं प्रोक्तं कर्मोपासनबोधनम्।
साधनं काण्डयुग्मोक्तं तृतीये साध्यमीरितम्॥ ७७॥
तस्माद्वेदोदितं कुर्यादुपासीत च देवताः।
शुद्धान्तःकरणस्तेन लभते ज्ञानमुत्तमम्॥ ७८॥
कार्यकारणसङ्घातं प्रविष्टश्चेतनात्मकः।
जीवो ब्रह्मैव सम्पूर्णमिति ज्ञात्वा विमुच्यते॥ ७९॥
मनुष्यदेहं सम्प्राप्य उपासीत च देवताः।
यो न मुच्येत संसारान्महापापयुतो हि सः॥ ८०॥

निष्कामभजने फलमाह – **वेदेति** । कर्मोपासनबोधनं कर्मकाण्डं – ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यादि । उपासनाकाण्डं – सूर्यो ब्रह्मेत्युपासीत यो ह वै ज्येष्ठं च वेदेत्यादि । इदं काण्डद्वयं साधनं ज्ञानस्य । तृतीयं ज्ञानकाण्डं–अयमात्मा ब्रह्मेत्यादि तस्मात्साध्यं फलभूतम् । तस्माज्ज्ञानप्राप्तये प्रयतितव्यमित्यर्थः ॥ ७७ ॥ तत्रोपायमाह – **तस्मादिति** । निष्कारणवेदोक्त चरणे देवतोपासने चान्तःकरणशुद्धिस्ततो न प्राप्तिरित्यर्थः ॥ ७८ ॥ ज्ञानस्वरूपमाह – **कार्येति** । कार्याणि कारणानि भूतानि च तत्संघातः शरीरम् । तच्चालकश्चेतना जीवो वस्तुतो ब्रह्मैवेति । साक्षात्कारो ज्ञानं तस्मान्मुक्तिः। तत्त्वमसि श्वेतकेतो अहं ब्रह्मास्मीत्यादि श्रुतेः ॥ ७९ ॥ ज्ञानायाप्रयतमानं निन्दति – **मनुष्येति** ॥ ८० ॥

भी प्रयोग बतलाये गए हैं उनकी आसक्ति का त्याग कर निष्काम रूप से देवता की पूजा करनी चाहिए ॥ ७६ ॥

वेदों में कर्मकाण्ड, उपासना और ज्ञान तीन काण्ड बतलाये गए हैं । 'ज्योतिष्टोमेन यजेत' यह कर्मकाण्ड है, 'सूर्यो ब्रह्मेत्युपासीत' यह उपासना है, ये दोनों काण्ड ज्ञान के साधन हैं 'अयमात्मा ब्रह्म' यह ज्ञान है जो स्वयं में साध्य है । यही उक्त दोनों का फल भी है । इसलिए ज्ञान प्राप्ति के लिए वेदोदित कर्म और उपासना दोनों में ही वेदोक्त मार्ग के अनुसार प्रवृत्त होना चाहिए । देवता की उपासना से अन्तःकरण शुद्ध हो जाता है । जिससे उत्तम ज्ञान की प्राप्ति होती है । कार्यकारणसंघात शरीर में प्रविष्ट हुआ जीव ही परब्रह्म है । इसी ज्ञान से साधक मुक्त हो जाता है । अतः मनुष्य देह प्राप्त कर देवताओं की उपासना से मुक्ति प्राप्त कर लेनी चाहिए । जो मनुष्य देह प्राप्त कर संसार बन्धन से मुक्त नही होता, वही महापापी है ॥ ८० ॥

आत्मज्ञानाप्तये तस्माद्यतितव्यं नरोत्तमैः ।
कर्मभिर्देवसेवाभिः कामाद्यरिगणक्षयात् ॥ ८१ ॥

देवतोपास्तिं कुर्वता भविष्यद्विचार्य प्रवर्तितव्यम्--

चिकीर्षुर्देवतोपास्तिमादौ भावि विचारयेत् ।
स्नानदानादिकं कृत्वा स्मृत्वा हरिपदाम्बुजम् ॥ ८२ ॥

शिवं मनसि ध्यात्वा निद्रां कुर्वतो स्वप्नप्रकारः

शयीत कुशशय्यायां प्रार्थयेद्वृषभध्वजम् ।
भगवन् देवदेवेश शूलभृद् वृषवाहन ॥ ८३ ॥
इष्टानिष्टे समाचक्ष्व मम सुप्तस्य शाश्वत ।
नमोऽजाय त्रिनेत्राय पिङ्गलाय महात्मने ॥ ८४ ॥
वामाय विश्वरूपाय स्वप्नाधिपतये नमः ।
स्वप्ने कथय मे तथ्यं सर्वकार्येष्वशेषतः ॥ ८५ ॥
क्रियासिद्धि विधास्यामि त्वत्प्रसादान्महेश्वर ।
एभिर्मन्त्रैः शिवं प्रार्थ्य निद्रां कुर्यान्निराकुलः ॥ ८६ ॥
स्वप्नं दृष्टं निशि प्रातर्गुरवे विनिवेदयेत् ।
तमन्तरेण मन्त्रज्ञः स्वयं स्वप्नं विचारयेत् ॥ ८७ ॥

फलिनमाह – **आत्मज्ञानेति** । कामक्रोधलोभा अरयस्तेषां क्षयं कृत्वा कृतैः कर्मभिर्वैदिकैर्देवोपासनादिभिश्चान्तः– करणशुद्धिद्वारा ज्ञानाप्तिरित्यर्थः ॥ ८१ ॥ देवोपास्तिं कुर्वता भविष्यद्विचार्यप्रवर्तिव्यमित्याह – **चिकीर्षुरिति** । विचारप्रकारमाह – **स्नानसंध्यादिकं कृत्वेत्यादिना** ॥ ८२ ॥ शिवप्रार्थनामन्त्रमाह – **भगवन्निति** ॥ ८३–८६ ॥ तमन्तरेण गुरुं विना शुभाशुभं स्वप्नं स्वयमेव विचारयेत् ॥ ८७ ॥

इसलिए उपासना और कर्म से काम-क्रोधादि शत्रुओं का नाश कर आत्मज्ञान की प्राप्ति के लिए सत्पुरुषों को सतत् प्रयत्न करते रहना चाहिए ॥ ७७-८१ ॥

देवता की उपासना करने वाले को अपना भविष्य विचार कर उसमें प्रवृत्त होना चाहिए । उसकी विधि इस प्रकार है -

स्नान और दान आदि करने के बाद भगवान् विष्णु के चरण कमलों का ध्यान कर कुश की शय्या पर सोना चाहिए । तथा भगवान शिव से **'भगवन् देवदेवेश .... त्वत्प्रसादान्महेश्वर'** पर्यन्त तीन श्लोकों से (द्र० २५. ८३-८६) से प्रार्थना कर निश्चिन्त हो सो जाना चाहिए ॥ ८२-८६ ॥

प्रातःकाल उठने पर देखा हुआ स्वप्न अपने गुरुदेव से बतला देना

शुभस्वप्नकथनम्

लिङ्गं चन्द्रार्कयोर्बिम्बं भारतीं जान्हवीं गुरुम् ।
रक्ताब्धितरणं युद्धे जयोऽनलसमर्चनम् ॥ ८८ ॥
शिखिहंसरथांगाढ्ये रथे स्नानं च मोहनम् ।
आरोहणं सारसस्य धरालाभश्च निम्नगा ॥ ८९ ॥
प्रासादः स्यन्दनः पद्मं छत्रं कन्या द्रुमःफली ।
नागो दीपो हयः पुष्पं वृषभोश्वश्च पर्वतः ॥ ९० ॥
सुराघटो ग्रहास्तारा नारी सूर्योदयोप्सराः ।
हर्म्यशैलविमानानामारोहो गगने गमः ॥ ९१ ॥
मद्यमांसादनं विष्ठालेपो रुधिरसेचनम् ।
दध्योदनादनं राज्याभिषेको गोवृषध्वजाः ॥ ९२ ॥
सिंहसिंहासनं शङ्खो वादित्रं रोचनादधि ।
चन्दनं दर्पणश्चैषां स्वप्ने संदर्शनं शुभम् ॥ ९३ ॥

तत्र शुभस्वप्नानाह – **लिंगमिति** । शिखीति । मयूरयुक्ते हंसयुक्ते चक्रयुक्ते वा रथे स्थितिः । मोहनं सुरतम् । निम्नगा नदीमात्रम् ॥ ८९ ॥ स्यन्दनो रथः। निम्नगाद्यप्सरोन्तानां दर्शनमेव शुभम् ॥ ९० ॥ हर्म्यादीनामारोहणम् ॥ ९१ ॥ मद्यमांसयोर्भक्षणम् । विष्ठया शरीरे लेपः रुधिरेण स्नानम् । दधिभक्त भक्षः। राज्यप्राप्तिः । एतानि शुभानि । गवादीनां दर्शनमेव शुभम् ॥ ९२–९३ ॥

चाहिए । उनके न होने पर स्वयं साधक को अपने स्वप्न के भविष्य के विषय में विचार कर लेना चाहिए ॥ ८७ ॥

अब **शुभाशुभ स्वप्न के विषय में** कहते हैं -

लिङ्ग, चन्द्र और सूर्यकर बिम्ब, सरस्वती, गङ्गा, गुरु, लालवर्ण वाले समुद्र में तैरना, युद्ध में विजय, अग्नि का अर्चन, मयूरयुक्त, हंसयुक्त अथवा चक्रयुक्त रथ पर बैठना, स्नान, संभोग, सारस की सवारी, भूमिलाभ, नदी, ऊँचे ऊँचे महल, रथ, कमल, छत्र, कन्या, फलवान् वृक्ष, सर्प अथवा हाथी, दीया, घोड़ा, पुष्प, वृषभ और अश्व, पर्वत, शराब का घड़ा, ग्रह नक्षत्र, स्त्री, उदीयमान सूर्य अप्सराओं का दर्शन, लिपे पोते स्वच्छ मकान पर, पहाड पर तथा विमान पर चढना, आकाश यात्रा, मद्य पीना, मांस ख़ाना, विष्टा का लेप, खून से स्नान, दही भात का भोजन, राज्याभिषेक होना (राज्य प्राप्ति), गाय, बैल और ध्वजा का दर्शन, सिंह और सिंहासन, शंख, बाजा, गोरोचन, दधि, चन्दन तथा दर्पण इनका स्वप्न में दिखलायी पड़ना शुभावह कहा गया है ॥ ८८-९३ ॥

अशुभस्वप्नकथनम्

तैलाभ्यक्तः कृष्णवर्णो नग्नो ना गर्तवायसौ ।
शुष्ककण्टकिवृक्षश्च चाण्डालो दीर्घकन्धरः ॥ ६४ ॥
प्रासादस्तलहीनश्च नैते स्वप्ने शुभावहाः ।
शान्तिं कुर्वीत दुःस्वप्ने जपेन्मन्त्रमनन्यधीः ॥ ६५ ॥
अब्दत्रिकं जपं तस्य कुर्वतो विघ्नसम्भवः ।
विघ्नसङ्घमनादृत्य तदा जपपरो भवेत् ॥ ६६ ॥
सिद्धौ विश्वस्तचित्तः संस्तुरीयेऽब्दे ससिद्धिभाक् ।

मन्त्रसिद्धेर्लक्षणम्

मनःप्रसादः सन्तोषः श्रवणं दुन्दुभिध्वनेः ॥ ६७ ॥
गीतस्य तालशब्दस्य गन्धर्वाणां समीक्षणम् ।
स्वतेजसः सूर्यसाम्येक्षणं निद्राक्षुधाजपः ॥ ६८ ॥
रम्यतारोग्यगाम्भीर्यमभावक्रोधलोभयोः ।
एवमादीनि चिह्नानि यदा पश्यति मन्त्रवित् ॥ ६६ ॥
सिद्धिं मन्त्रस्य जानीयाद् देवतायाः प्रसन्नताम् ।

अशुभस्वप्नानाह – **तैलेति** । तैलाभ्यक्तो ना पुरुषः । नग्नादीना दर्शनमशुभम् ॥ ६४–६६ ॥ मन्त्रसिद्धेर्लक्षणमाह – **मनः प्रसाद इति** ॥ ६७–१०० ॥

तैल की मालिश किए पुरुष का, काला अथवा नग्न व्यक्ति का, गड्ढा, कौआ, सूखा वृक्ष, काँटेदार वृक्ष, चाण्डाल, बड़े कन्धे वाला पुरुष, तल (छत) रहित पक्का महल इनका स्वप्न में दिखलाई पड़ना अशुभ है ॥ ६४-६५ ॥

दुःस्वप्न की शान्ति के उपाय - दुःस्वप्न दिखई पड़ने पर उसकी शान्ति करानी चाहिए । तदनन्तर एकाग्रमन से इष्टदेव के मन्त्र का जप करना चाहिए। ३ वर्ष तक जप करने वाले को विघ्न की संभावना रहती है, अतः विघ्नसमूह की परवाह न कर अपने जप में तत्पर रहना चाहिए । अपने चित्त में विश्वस्त रहने वाला सिद्धपुरुष चौथे वर्ष में अवश्य ही सिद्धि प्राप्त कर लेता है ॥ ६५-६७ ॥

अब **मन्त्र सिद्धि का लक्षण** कहते हैं -

मन में प्रसन्नता आत्मसन्तोष, नगाड़े की ध्वनि, गाने की ध्वनि, ताल की ध्वनि, गन्धर्वों का दर्शन, अपने तेज को सूर्य के समान देखना, निद्रा, क्षुधा, जप करना, शरीर का सौन्दर्य बढना, आरोग्य होना, गाम्भीर्य, क्रोध और लोभ का अपने में सर्वथा अभाव, इत्यादि चिन्ह जब साधक को दिखाई पड़े तो मन्त्र की सिद्धि तथा देवता की प्रसन्नता समझनी चाहिए ॥ ६७-१०० ॥

लब्धज्ञानिनः कृतार्थताकथनम्

ततो जपेधिकं यत्नं प्रकुर्याज्ज्ञानलब्धये ॥ १०० ॥
लब्धज्ञानः कृतार्थः स्यात्संसारात्प्रतिमुच्यते ।
ज्ञात्वात्मानं परं ब्रह्मवेदान्तैः प्रतिपादितम् ॥ १०१ ॥

ग्रन्थसमाप्तौ मङ्गलाचरणम्

तं वन्दे परमात्मानं सर्वव्यापिनमीश्वरम् ।
यो नानादेवतारूपो नृणामिष्टं प्रयच्छति ॥ १०२ ॥
विलोक्य नानातन्त्राणि प्रार्थितो द्विजसत्तमैः ।
स्वमतेरनुसारेण कृतो मन्त्रमहोदधिः ॥ १०३ ॥

ग्रन्थकर्तुस्तरंगानुक्रमणिकाकथनम्

बाणनेत्रमितास्तस्मिंस्तरङ्गाः सन्ति निर्मिताः ।
तत्रानुक्रमणीं वक्ष्ये मन्त्रिणां सुखवृद्धये ॥ १०४ ॥

आत्मसाक्षात्कारपर्यन्तमेव मन्त्रोपास्तिरित्याह – **लब्धज्ञान इति** । अहं ब्रह्मेति साक्षात्कारो ज्ञानमित्यर्थः ॥ १०१ ॥ ग्रन्थसमाप्तौ मंगलमाचरति – **तं वन्दे** इति । ब्रह्मैव नानादेवतारूपेण जनैः सेव्यत इत्यर्थः । 'यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति । तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम् । स तया श्रद्धया युक्तस्तस्याराधनमीहते । लभते च ततः कामान् मयैव विहितान्हितान्' इति भगवद्वचनात् ॥ १०२ ॥ ग्रन्थकरणे हेतुमाह – **विलोक्येति** । ब्राह्मणप्रार्थनमेव हेतुः ॥ १०३ ॥ वाणनेत्रमिताः पञ्चविंशतिः ॥ १०४ ॥

अब **मन्त्र सिद्धि के बाद के कर्त्तव्य** का निर्देश करते हैं - मन्त्र सिद्धि प्राप्त कर लेने वाले साधक को ज्ञान प्राप्ति के लिए जप की संख्या में निरन्तर वृद्धि का यत्न करते रहना चाहिए । जब वेदान्त प्रतिपादित (अयमात्माब्रह्म, अहं ब्रह्मास्मि, तत्त्वमसि श्वेतोकेतो इत्यादि) तत्त्वों का ज्ञान प्राप्त हो जाय तब साधक कृतार्थ हो जाता है और संसार बन्धन से छूट जाता है ॥ १००-१०१ ॥

अब **ग्रन्थ समाप्ति में पुनः मङ्गलाचरण** करते हैं - सर्वव्यापी ईश्वर परमात्मा की मैं वन्दना करता हूँ, जो अनेक देवताओं का स्वरूप ग्रहण कर मनुष्यों के अभीष्टों को पूरा करते हैं ॥ १०२ ॥

ग्रन्थ रचना का हेतु - श्रेष्ठ विद्वान् ब्राह्मणों द्वारा प्रार्थना किये जाने पर अनेक तन्त्र ग्रन्थों का अवलोकन कर अपनी बुद्धि के अनुसार मैंने इस मन्त्र महोदधि नामक ग्रन्थ की रचना की है । यही इस ग्रन्थ की रचना का हेतु है ॥ १०३ ॥

भूतशुद्धिस्तथा प्राणप्रतिष्ठान्यसनं लिपेः ।
पुरश्चर्याहोमविधिस्तर्पणाद्याद्य ईरितम् ॥ १०५ ॥
द्वितीयोर्मौ गणेशस्य मन्त्राः सम्यक्समीरिताः ।
कालीकाल्यभिधानानां सुमुख्याश्च तृतीयके ॥ १०६ ॥
तारातुरीये सम्प्रोक्ता ताराभेदास्तु पञ्चमे ।
षष्ठे तरङ्गे गदिता छिन्नमस्ताशबर्यपि ॥ १०७ ॥
स्वयंवरामधुमती प्रमदा च प्रमोदया ।
बन्दीबन्धनहारीति सप्तमे वटयक्षिणी ॥ १०८ ॥
तस्या भेदाश्च वाराही ज्येष्ठा कर्णपिशाचिनी ।
स्वप्नेश्वरी च मातङ्गी बाणेशी मदनेश्वरी ॥ १०९ ॥
अष्टमे विस्तरात्प्रोक्ता बाला बालाभिदा अपि ।
नवमे त्वन्नपूर्णोक्ता तद्भेदामोहनाद्रिजा ॥ ११० ॥

अनुक्रमणीमाह – **भूतशुद्धिरिति** । लिपेर्मातृकायान्यसनं न्यासः । आद्ये प्रथमतरंगे एतदीरितम् ॥ १०५ ॥ द्वितीयोर्मौ द्वितीयतरंगे गणेशमन्त्राः । काल्यादितृतीये ॥ १०६ ॥ बन्धनहारीति । बन्दीविशेषणम् । छिन्नमस्तादिशबर्यन्तंषष्ठे ॥ १०७–१०८ ॥ वाराहीवार्तालीवटयक्षिण्यादिकामेश्वर्यन्तं सप्तमे ॥ १०९ ॥

अब प्रसङ्ग प्राप्त **मन्त्रमहोदधि की अनुक्रमणिका** कहते हैं -

इस मन्त्रमहोदधि में पच्चीस तरङ्ग हैं । मान्त्रिकों की सुविधा के लिए अब उनकी अनुक्रमणिका कहता हूँ ॥ १०४ ॥

प्रथम तरङ्ग में भूतशुद्धि, प्राणप्रतिष्ठा, मातृकान्यास, पुरश्चरण और होम की विधि तथा तर्पण का विषय प्रतिपादन किया गया है ॥ १०५ ॥

द्वितीय तरङ्ग में गणेश के विविध मन्त्र और उनकी सिद्धि के प्रकार कहे गए हैं ।

तृतीय तरङ्ग में काली तथा काली नाम से अभिहित दक्षिणाकाली आदि के अनेक मन्त्र एवं सुमुखी के मन्त्र का प्रतिपादन एवं काम्यप्रयोग कहा गया है ॥ १०६ ॥

चतुर्थ तरङ्ग में तारा की उपासना तथा **पञ्चम तरङ्ग** में तारा के भेद कहे गए हैं ।

छठे तरङ्ग में छिन्नमस्ता, शबरी, स्वयम्बरा, मधुमती, प्रमदा, प्रमोदा, बन्दी जो बन्धन से मुक्त करती हैं - उनके मन्त्रों को बताया गया है ॥ १०७-१०८ ॥

सप्तम तरङ्ग में वटयक्षिणी, वटयक्षिणी के भेद, वाराही, ज्येष्ठा, कर्णपिशाचिनी, स्वप्नेश्वरी, मातङ्गी, बाणेशी एवं कामेशी के मन्त्रों को प्रतिपादित किया गया है ॥ १०८-१०९ ॥

ज्येष्ठालक्ष्मीरत्र मन्त्रा उक्ता प्रत्यङ्गिरारिहा।
दशमे बगलावक्त्रावाराहीद्वितयं तथा ॥ १११ ॥
श्रीविद्यैकादशे प्रोक्ता द्वादशे तु तदावृतिः।
त्रयोदशे तु हनुमान्विस्तरात् प्रतिपादितः ॥ ११२ ॥
चतुर्दशे नारसिंहो गोपालो गरुडोऽपि च।
अथ पञ्चदशे सूर्यो भौमो जीवः सितो मुनिः ॥ ११३ ॥
षोडशोर्मौ महामृत्युञ्जयो रुद्रो धनेश्वरः।
जाह्नवीमणिकर्णी च प्रोक्ता सप्तदशेऽर्जुनः ॥ ११४ ॥
अष्टादशे कालरात्रिश्चण्डिकाया नवाक्षरः।
एकोनविंशे चरणयुधः शास्तृसमन्वितः ॥ ११५ ॥
पार्थिवार्चनकीनाशचित्रगुप्तासुरीविधिः ।

मोहनाद्रिजा मोहनगौरी ॥ ११० ॥ अरिहा शत्रुनाशकः षोडशार्णः । बगला–वक्त्रा बगलामुखी ॥ १११॥ तदावृत्तिः श्रीविद्याया आवरणपूजा ॥ ११२॥ मुनिर्वेदव्यासः ॥ ११३–११४ ॥ चरणायुधः कुक्कुटमन्त्रः ॥ ११५ ॥ कीनाशोऽयम् ॥ ११६ ॥

अष्टम तरङ्ग में त्रिपुराबाला तथा उनके भेदों का विवेचन विस्तार से किया गया है । **नवम तरङ्ग** में अन्नपूर्णा, उनके भेद त्रैलोक्यमोहन गौरी एवं ज्येष्ठालक्ष्मी तथा उनके साथ ही प्रत्यंगिरा के भी मन्त्रों का निर्देश किया गया है ॥ ११०-१११ ॥

दशम तरङ्ग में बगलामुखी तथा वाराही को भी बतलाया गया है ॥ १११ ॥

एकादश तरङ्ग में श्रीविद्या तथा **द्वादश तरङ्ग** में उनके आवरण पूजा की विधि बताई गई है ।

त्रयोदश तरङ्ग में हनुमान् के मन्त्रों एवं प्रयोगों का विशद् रूप से प्रतिपादन किया गया है ॥ ११२ ॥

चतुर्दश तरङ्ग में नृसिंह, गोपाल एवं गरुड मन्त्रों का प्रतिपादन है ।

पञ्चदश तरङ्ग में सूर्य, भौम, बृहस्पति, शुक्र एवं वेदव्यास के मन्त्रों को बताया गया है ॥ ११३ ॥

षोडश तरङ्ग में महामृत्युञ्जय, रुद्र एवं गङ्गा तथा मणिकर्णिका के मन्त्र कहे गए हैं।

सप्तदश तरङ्ग में कार्त्तवीर्यार्जुन के मन्त्र, दीपदान विधि आदि का वर्णन है ।

अष्टादश तरङ्ग में कालरात्रि के मन्त्र, नवार्णमन्त्र, शतचण्डी और सहस्रचण्डी विधान का सविस्तार वर्णन किया गया है ॥ ११४-११५ ॥

उन्नीसवें तरङ्ग में चरणायुध मन्त्र, शास्ता मन्त्र, पार्थिवार्चन, धर्मराज, चित्रगुप्त के मन्त्रों का प्रतिपादन करते हुये आसुरी (दुर्गा) विधि का प्रतिपादन किया गया है ॥ ११५-११६ ॥

विंशे तरङ्गे यन्त्राणि स्वर्णाकर्षणभैरवः ॥ ११६ ॥
स्नानादिरन्तर्यागान्त एकविंशेर्चनाविधिः ।
द्वाविंशेऽर्घ्यं समारभ्य पूजनं तद्भिदा अपि ॥ ११७ ॥
त्रयोविंशे तु दमनैः पवित्रैश्च सर्मचनम् ।
चतुर्विंशे च भेदेन मन्त्राणां परिशेधनम् ॥ ११८ ॥
तरङ्गे चरमे प्रोक्तं कर्मषट्कमनुक्रमात् ।
एवं मन्त्रोदधावस्मिन् पञ्चविंशतिरूर्मयः ॥ ११९ ॥
विशोधनीया विद्वद्भिः क्षन्तव्यं साहसं मम ।
चापलं निजबालानां क्षमते जनको यथा ॥ १२० ॥

ग्रन्थकर्तुः स्ववंशकथनम्

अहिच्छत्रद्विजच्छत्रवत्सगोत्रसमुद्भवः ।
आसीद्रत्नाकरो नाम विद्वान्ख्यातो धरातले ॥ १२१ ॥

तद्भिदाः पूजाभेदाः ॥ ११७–११८ ॥ चरमे पञ्चविंशे तरंगे । शान्त्यादिकर्म–षट्कमनुक्रमणी चेति ॥ ११९–१२० ॥ स्ववंशमाह – **अहिच्छत्रेति** ॥ १२१–१२५ ॥

बीसवें तरङ्ग में विविध यन्त्र, स्वर्णाकर्षण भैरव की उपासना विधि तथा अनेक यन्त्रों का वर्णन है ।

इक्कीसवें तरङ्ग में स्नान से लेकर अर्न्तयाग तथा नित्यकर्म का वर्णन है ।

बाइसवें तरङ्ग में अर्घ्यस्थापन से लेकर पूजन पर्यन्त के कृत्य तथा पूजा के भेद बतलाये गए हैं ॥ ११६-११७ ॥

त्रयोविंशति तरङ्ग में दमनक तथा पवित्रक से इष्टदेव के सर्मचन का विधान कहा गया है ।

चौबीसवें तरङ्ग में मन्त्र शोधन की नाना प्रकार की प्रक्रिया कही गई है ।

पच्चीसवें तरङ्ग में षट्कर्मों के समस्त विधान का निर्देश है ॥ ११८-११९ ॥

इस प्रकार मन्त्रमहोदधि के पच्चीस तरङ्गों में उक्त समस्त विषयों का वर्णन किया गया है ॥ ११६-११९ ॥

अब ग्रन्थकार ग्रन्थ का उपसंहार कर विशेषज्ञों से प्रार्थना करते हैं कि आवश्यकता पड़ने पर विशेषज्ञों को इसमें संशोधन कर लेना चाहिए, जिस प्रकार पिता अपने बालकों की चपलता क्षमा करता है, उसी प्रकार मन्त्र के विषय में किए गए साहस को भी विज्ञजन क्षमा करेंगें ॥ १२० ॥

अब ग्रन्थकार अपना **स्ववंश परिचय** देते हैं - अहिच्छत्र देश में द्विजों के छत्र के समान वत्स गोत्र में उत्पन्न, धरातल में अपनी विद्वत्ता से विख्यात रत्नाकर नाम

तत्तनूजो रामभक्तः फनूभट्टाभिधोऽभवत् ।
महीधरस्तदुत्पन्नः संसारासारतां विदन् ॥ १२२ ॥
निजदेशं परित्यज्य गतो वाराणसीं पुरीम् ।
सेवमानो नरहरिं तन्त्र ग्रन्थमिमं व्यधात् ॥ १२३ ॥
कल्याणभिधपुत्रेण तथान्यैर्द्विजसत्तमैः ।
अनेकानागमग्रन्थान् विलोक्य तु मुनीश्वरैः ॥ १२४ ॥
एकग्रन्थे स्थितं सर्वं मन्त्राणां सारमिच्छुभिः ।
सम्प्रार्थितः स्वमत्यासौ नाम्ना मन्त्रमहोदधिः ॥ १२५ ॥

ग्रन्थान्ते आशीः कथनम्

अविच्छिन्नान्वयाः सन्तु निजधर्मपरायणाः ।
मङ्गलानि प्रपश्यं तु सर्वे द्रोहपराङ्मुखाः ॥ १२६ ॥
हरिः करोतु कल्याणं सर्वेषां जगदीश्वरः ।
प्रवर्तयन्त्विमं ग्रन्थं यावद्वेदो रविः शशी ॥ १२७ ॥

ग्रन्थान्ते आशिषन्नाह – **अविच्छिन्नेति** ॥ १२६–१२७ ॥

के ब्राह्मण हुये ॥ १२१ ॥

उनके लड़के फनूभट्ट हुये, जो भगवान् श्री राम के प्रकाण्ड भक्त थे । उनके पुत्र **श्रीमहीधर** हुये, जिन्होने संसार की असारता को जान कर अपना देश छोड़ कर काशी नगरी में आकर भगवान् नृसिंह की सेवा करते हुये **मन्त्रमहोदधि** नामक इस तन्त्र ग्रन्थ की रचना की ॥ १२२-१२३ ॥

अनेक ग्रन्थों में लिखे गए नाना प्रकार के मन्त्रों के सार को किसी एक ग्रन्थ में निबद्ध करने की इच्छा रखने वाले तथा आगम ग्रन्थों के मर्मज्ञ महामुनियों, श्रेष्ठ ब्राह्मणों एवं **कल्याण** नामक स्वकीय पुत्र के द्वारा प्रार्थना किए जाने पर मैंने अपनी बुद्धि के अनुसार इस **मन्त्रमहोदधि** नामक ग्रन्थ की रचना की है ॥ १२४-१२५ ॥

अब ग्रन्थकार ग्रन्थ के अन्त में **आशीर्वचन** कहते हैं -

इस ग्रन्थ का अभ्यास करने वाले समस्त पाठकगण अपने धर्म में परायण रहें । सर्वदा कल्याण का दर्शन करें । द्रोह से सर्वथा पराङ्मुख रहें और उनकी वंशपरम्परा अविच्छिन्न रूप से चलती रहे ॥ १२६ ॥

अब **जगदीश्वर से प्रार्थना** करते हुये ग्रन्थ की समाप्ति करते हैं -

जगदीश्वर श्रीहरि सभी का कल्याण करें और जब तक वेद, सूर्य तथा चन्द्रमा रहें तब तक इस ग्रन्थ का प्रचार प्रसार करते रहें ॥ १२७ ॥

श्लोकत्रयेण देवप्रार्थना

नरसिंहो महादेवो महादेवार्तिनाशनः।
मुदे परो महालक्ष्म्या देवावर नतोऽस्तु मे॥ १२८॥
नृसिंहउत्सङ्गसमुद्रजायां
समुद्रजद्वीपगृहे निषण्णः।
समुद्रजोहीनमतिः सदाव्यात्
समुद्रभक्ताखिलसिद्धिदायी॥ १२६॥
राजा लक्ष्मीनृसिंहो जयति सुखकरं श्रीनृसिंहं भजे यं
दैत्याधीशामहान्तोऽहसतनृहरिणा श्रीनृसिंहाय नौमि।
सेव्यो लक्ष्मीनृसिंहादपर इह नहि श्रीनृसिंहस्य पादौ
सेवे लक्ष्मीनृसिंहे वसतु मम मनः श्रीनृसिंहाव भक्तम्॥ १३०॥
विश्वेशो गिरिजाबिन्दुमाधवो मणिकर्णिका।
भैरवो जाह्नवीदण्डपाणिर्मे तन्वतां शिवम्॥ १३१॥

श्लोकत्रयेण देवं प्रर्थयते । **नरसिंह** इति । नृसिंहो मे मुदे हर्षायास्तु । देवानामावरेण समूहेन नतः । नृसिंह इति – नृसिंहो मांसदाऽव्यात् । कीदृशः । उत्संगे समुद्रजा लक्ष्मीर्यस्य सः । समुद्रे जातं यच्छ्वेतद्वीपं तत्र यद्गृहं तत्रोपविष्टः समुत्सहर्षः । रजोहीनमतिविरजाः । समुद्रा अञ्जल्यादिमुद्राविदो ये भक्तास्तेषां सर्वसिद्धिदाता॥ १२६॥ **राजा लक्ष्मीनृसिंह** इति । विभक्तिसप्तकेन हरिं स्तौति । नृहरिणा महान्तो दैत्याधीशा अहसत हताः । हन्तेर्लुङ्गि कर्मणि चिण्वदिड्भावे रूपम्। श्रीनृसिंहाव श्रीनृसिंहभक्तम् अव रक्ष॥ १३०॥ देवान् स्मरति – **विश्वेश**

समस्त देवगणों की विपत्ति को दूर करने वाले, देवगणों से वन्दित **लक्ष्मी सहित श्रीनृसिंह देव** हमें निरन्तर हर्ष प्रदान करते रहें॥ १२८॥

क्षीर सागर के मध्य में स्थित श्वेत द्वीप के मण्डप में अपनी गोद में स्थित लक्ष्मी के साथ विराजमान, प्रसन्नता से पूर्ण भगवान् श्री नृसिंह मेरी रक्षा करें, जो अञ्जलि आदि मुद्राओं से पूजा करने वाले अपने भक्तों को समस्त सिद्धियाँ प्रदान करते हैं वह **भगवान् श्रीनृसिंह** मुझे रजोगुण रहित सद्बुद्धि दें॥ १२७-१२६॥

भगवान् श्री **लक्ष्मीनृसिंह** की जय हो । मैं परमकल्याणकारी श्री नृसिंह की वन्दना करता हूँ, जिन नृसिंह ने महाबलवान् बड़े बड़े दैत्यों का वध किया उन नरहरि को मैं प्रणाम करता हूँ ।

लक्ष्मीनृसिंह से बढ़ कर और कोई देवता नही है। इसलिए श्री नृसिंह के चरण कमलों की सेवा करनी चाहिए । यही सोंच कर श्रीनृसिंह मेरे मन में निवास

ग्रन्थनिर्मितिकालकथनम्

अब्दे विक्रमतो जाते बाणवेदनृपैर्मिते ।
ज्येष्ठाष्टम्यां शिवस्याग्रे पूर्णो मन्त्रमहोदधिः ॥ १३२ ॥

॥ इति श्रीमन्महीधरविरचिते मन्त्रमहोदधौ षट्कर्मादिनिरूपणं नाम पञ्चविंशस्तरङ्गः ॥ २५ ॥



इति । ग्रन्थनिष्पत्तिस्थानं काशीस्थानम् ॥ १३१ ॥

ग्रन्थनिर्मितिकालमाह – अब्दे विक्रमत इति । बाणवेदनृपैर्मिते वर्षे पञ्चचत्वारिंशदुत्तरषोडशशततमे विक्रमनृपादन्ते सति शिवस्य रामेश्वरस्याग्रे मन्त्रमहोदधिः समाप्तिमगमत् ॥ १३२ ॥

॥ इति श्रीमन्महीधरविरचितायां मन्त्रमहोदधिव्याख्यायां नौकायां षट्कर्मादिनिरूपणं नाम पञ्चविंशस्तरङ्गः ॥ २५ ॥



करें । यह मेरा मन कभी भी नृसिंह से अलग न हो ॥ १३० ॥

बाबा विश्वनाथ, भवानी अन्नपूर्णा, बिन्दुमाधव, मणिकर्णिका, भैरव, भागीरथी तथा दण्डपाणी मेरा सतत् कल्याण करें ॥ १३१ ॥

विक्रम संवत् १६४५ में ज्येष्ठ शुक्ला अष्टमी को बाबा विश्वनाथ के सान्निध्य में यह मन्त्रमहोदधि नामक ग्रन्थ पूर्ण हुआ ॥ १३२ ॥

शून्यं बाणे खयुग्मान्दे वैक्रमीये व्यये शुभे ।
ऊर्जे मासि सिते पक्षे पूर्णेन्दौ चन्द्रवासरे ॥ १ ॥
समाप्तिमगमद्टीका सैषा सागरगामिनी ।
सुधाकरेण विहिता मन्त्रशास्त्रमहोदधेः ॥ २ ॥
प्रीयेतामनया देवी पार्वतीपरमश्वरी ।
शान्तिं विधत्तां मे गेहे ददेतामाशिषं शुभाम् ॥ ३ ॥

॥ इस प्रकार श्रीमन्महीधर विरचित मन्त्रमहोदधि के पञ्चविंश तरङ्ग की महाकवि पं० रामकुबेर मालवीय के द्वितीय आत्मज डॉ० सुधाकर मालवीय कृत 'अरित्र' नामक हिन्दी व्याख्या पूर्ण हुई ॥ २५ ॥



॥ श्रीः ॥

परिशिष्ट १

अथ मातृकाकोशः

श्रीगणेशं महेशानं भारतीमीश्वरं शिवम् ।
नत्वा वक्ष्ये मातृकाणां निघण्टुं बालबुद्धये ॥ १ ॥
(ॐ) ध्रुवस्तारस्त्रिवृद्ब्रह्म वेदादिस्तारको ऽव्ययः ।
प्रणवश्च त्रिमात्रोऽपि ॐकारो ज्योतिरादितः ॥ २ ॥
(अ) श्रीकण्ठः केशवश्चापि निवृत्तिश्च स्वरादिकः ।
अकारो मातृकाद्यश्च वात इत्यभिधीयते ॥ ३ ॥
(आ) नारायणस्तथाऽनन्तो मुरवृत्तो गुरुस्तथा ।
विष्णुशय्या तथा शेषो दीर्घआकार एव च ॥ ४ ॥
(इ) माधवस्सूक्ष्मसंज्ञश्च विद्यादक्षिणलोचनम् ।
गन्धर्वः पाञ्चजन्य इकारश्च मुकांकुरः ॥ ५ ॥
(ई) गोविन्दाश्च त्रिमूर्तीशः शान्तिः स्याद्वामलोचनम् ।
नृसिंहास्त्रं तथा माया ईकारोऽपि सुरेश्वरः ॥ ६ ॥
(उ) अमरेशस्तथा विष्णुरिन्धिका च गजांकुशः ।
दक्षकर्णश्च विजयी उकारो मन्मथाधिपः ॥ ७ ॥
(ऊ) अर्वाशो दीपिका वाम श्रवणं मधुसूदनः ।
इन्द्रचापषण्मुखश्च ऊकारो रक्षणाधिपः ॥ ८ ॥
(ऋ) देविका दक्षनासा च भारभूतिस्त्रिविक्रमः ।
देवमातारिपुघ्नश्च ऋकारस्तपनस्तथा ॥ ९ ॥
(ॠ) अतिथीशो वामनश्च मोचिका वामनासिका ।
दैत्यमाता च दैवज्ञ ॠकारस्त्रिपुरान्तकः ॥ १० ॥
(ऌ) श्रीधरश्च परास्थाणुर्दक्षगण्डस्त्रिवेदकः ।
एकाङ्घ्रिर्वज्रदण्डश्च व्योमर्द्धिर्ऌ स्वरस्स्मृतः ॥ ११ ॥
(ॡ) हृषीकेशो हरस्सूक्ष्मो वामगण्डः कुबेरदृक् ।
अर्द्धर्चो नीलचरणो ॡकारश्च त्रिकूटकः ॥ १२ ॥
(ए) झिण्टीशः पद्मनाभश्च शक्तिस्सूक्ष्मा स्मृता भगः ।
ऊर्द्धोष्ठगः कामरूप एकारश्च त्रिकोणकः ॥ १३ ॥
(ऐ) ज्ञानामृतो भौतिकश्चाऽधरो दामोदरस्तथा ।
वागीशोवर्मभयद ऐकारस्त्रिपुरस्तथा ॥ १४ ॥

(ओ) सद्योजातो वासुदेव ऊर्ध्वदन्तस्त्रिमात्रकः ।
आप्यायनीमन्त्रनाथ ओकारोनागसंज्ञकः ॥ १५ ॥
(औ) संकर्षणोऽनुग्रहेशो मुरारिर्व्यापिनी तथा ।
अथोदन्तगतो मायी नृसिंहाङ्गस्तथौरसः ॥ १६ ॥
(अं) अक्रूरो व्योमरूपश्च प्रद्युम्नश्चन्द्रसंज्ञकः ।
अनुस्वारस्तथा बिन्दुरंकारश्च शिरोऽव्ययः ॥ १७ ॥
(अः) अनन्तश्च महासेनोऽनिरुद्धो रसवर्णकः ।
कन्यास्तननिभस्सर्गो विसर्गश्चान्तिमस्स्वरः ॥ १८ ॥
(क) क्रोधीशो धातृसंज्ञश्चक्रीसृष्टिश्च करादिगः ।
वर्गादिगः पादवेषः ककारः कामगस्स्मृतः ॥ १९ ॥
(ख) क्रुधार्द्धिगदिचण्डीशाः खेटो दक्षिणकूर्परः ।
कैटभारिश्च मातङ्गः संहारः खार्णकः स्मृतः ॥ २० ॥
(ग) स्मृतिः पञ्चान्तकश्शाङ्र्गी गणेशो मणिबन्धगः ।
गोमुखो गजकुम्भश्च गकारः सिंहसंज्ञकः ॥ २१ ॥
(घ) खड्गी शिवोत्तमो मेधा दक्षिणाङ्गुलिमूलगः ।
घनो घनस्वरश्चैव घकारो ङादिमस्मृतः ॥ २२ ॥
(ङ) संज्ञाको रुद्रकान्तिश्च दक्षाङ्गुल्यग्रसंस्थितः ।
क्लीबवक्त्रश्च भद्रेशो ङकारश्चानुनासिकः ॥ २३ ॥
(च) हलीकूर्मेश्वरो लक्ष्मीर्वावबाह्वादिगस्तथा ।
चित्रधारी चञ्चलश्च चकारस्संस्मृतो बुधैः ॥ २४ ॥
(छ) एकनेत्रश्च मुसली वामकूर्परगो द्युतिः ।
त्रिबिन्दुकस्तथा चारी छकारः श्लेष्मकाभिधः ॥ २५ ॥
(ज) स्थिराजपन्नौजपजश्शूली च चतुराननः ।
मणिबन्धगतो वामे जकाराञ्जनकोत्तमः ॥ २६ ॥
(झ) स्थितिः पाशी तथाजेशो वामाङ्गुलितलस्थितः ।
स्वस्तिकस्स्थाणुसंज्ञश्च झकारो जान्तसंज्ञकः ॥ २७ ॥
(ञ) वामाङ्गुल्याग्रतः सिद्धिरंकुशीसर्वसंज्ञकः ।
मातङ्गो ह्यनुगानश्च ञकारश्च निरञ्जनः ॥ २८ ॥
(ट) जरामुकुन्दस्सोमेशो दक्षपादादिगोमुखः ।
गजांकुशश्च बालेन्दुरमृताद्यष्टकस्स्मृतः ॥ २९ ॥
(ठ) लाङ्गलीशो नन्दजश्च पालिनी च कमण्डलुः ।
दक्षजानुगतस्स्थायी ठकारस्स्थविरस्मृतः ॥ ३० ॥
(ड) नन्दीक्षान्तिर्दारकश्च डामरो दक्षगुल्फगः ।

व्याघ्रपादश्शुभाङ्घ्रिश्च डकारस्तोमरो मतः ॥ ३१ ॥

(ढ) ऐश्वरी चार्द्धनारीशो नरश्शाखान्तराकृतिः ।
दक्षपादाङ्गुलीमूलो ढलो ढक्को ढकारकः ॥ ३२ ॥

(ण) उमाकान्तो नरकजिद् रतिर्दक्षपदाग्रगः ।
निर्वाणास्त्रिगुणाकारस्त्रिरेखोणस्समीरितः ॥ ३३ ॥

(त) वामोरुमूलनिलय आषाढी कामिका हरिः ।
तीव्रश्च तरलो नीलस्तकारः कीर्तितो बुधैः ॥ ३४ ॥

(थ) दण्डीशो वरदः कृष्णो वामजानुगतस्मरः ।
शौरी चापि विशालाक्षस्थकारः परिकीर्तितः ॥ ३५ ॥

(द) सत्योत्रीशो ह्लादिनी च वामगुल्फगतस्तथा ।
शूली कुबेरो दाता च दकारो धादिमः स्मृतः ॥ ३६ ॥

(ध) मीनेशस्सात्वत प्रीतिर्वामपादाङ्गुलीगतः ।
धनेशो धरणीशश्च धकारो दान्तिमः स्मृतः ॥ ३७ ॥

(न) शौरीमेषेश्वरीदीर्घा वामपादाग्रसंस्थितः ।
नरो न दीनो नादी च नकारश्चानुनासिकः ॥ ३८ ॥

(प) तीक्ष्णा च लोहितश्शूरो दक्षपार्श्वश्च पार्थिवः ।
पद्मेशो नान्तिमः फादिः पकारोऽपि प्रकीर्तितः ॥ ३९ ॥

(फ) जनार्दनः शिखी रौद्री वामपार्श्वकृतालयः ।
फट्कारः प्रोच्यते सद्भिः फकारः पान्तिमस्स्मृतः ॥ ४० ॥

(ब) छलगण्डो भूधरश्च भयापृष्ठगतस्तथा ।
सुरसो वज्रमुष्टिश्च बकारो भादिमो मतः ॥ ४१ ॥

(भ) विश्वमूर्तिर्द्विरण्डेशो निद्रा नाभिगतोऽपि च ।
भ्रुकुटी च भरद्वाजो भकारश्च जयापहः ॥ ४२ ॥

(म) वैकुण्ठश्च महाकालस्तन्द्री जठरसंस्थितः ।
मन्त्रेशो मण्डलो मानीं विषस्सूर्योमकारकः ॥ ४३ ॥

(य) क्षुधा बाला च वायुस्त्वग्धृतश्च पुरुषोत्तमः ।
यमुनो यामुनेयश्च यकारो मान्तिमः स्मृतः ॥ ४४ ॥

(र) क्रोधिनी च भुञ्जगेशी ज्वाली रुधिरपावकौ ।
रोचिष्मान्दक्षिणांशश्च रुचिरो रेफ ईरितः ॥ ४५ ॥

(ल) क्रियाककुद्गतो मांसं पिनाकीभूर्बलानुजः ।
लम्पटः शक्रसंज्ञश्च वाद्यो रान्तो लकारकः ॥ ४६ ॥

(व) बालो वामांसनिलयो मेदो वारिदवारुणौ ।
उत्कारी जलसंज्ञश्च खड्गीशोऽपि वकारकः ॥ ४७ ॥

(श) मृत्युर्बको वृषघ्नश्च हृदो दक्षकरस्थितः ।
शंकुकर्णोऽस्थिसंज्ञश्च शकारो विद्वद्भिरीरितः ॥ ४८ ॥
(ष) वृषः श्वेतेश्वरः पीतमज्जाहृद्वामबाहुगः ।
षडाननः षकारश्च कीर्तितश्च बुधैः खरः ॥ ४६ ॥
(स) भृगुः श्वेतस्तथा हंसो हृदो दक्षिणपादगः ।
समयस्सामगश्शुक्रस्सङ्गतिस्सार्णकश्शशी ॥ ५० ॥
(ह) नभो वराहो नकुलो हृदो वामपदस्थितः ।
सदाशिवोऽरुणः प्राणो हकारश्च हयाननः ॥ ५१ ॥
(ळ) हृदयान्नाभिसंस्थानशिवेशो विमलोऽसितः ।
लघुप्रयत्नश्चोपान्त्यो ळकारः प्रोच्यते बुधैः ॥ ५२ ॥
(क्ष) संवर्त्तको नृसिंहश्च हृदयान्मुखसंस्थितः ।
अनन्तः परमात्मा च वज्रकायोऽन्तिमाक्षरः ॥ ५३ ॥

॥ इति हादिमते मातृकाकोशः समाप्तः ॥



परिशिष्ट २

श्लोकानुक्रमणिका

इ

झ

ट

ड

ढ

त

भ

य

ल

व



डॉ॰ सुधाकर मालवीय का जन्म (१९४४ ई॰) कड़ा, शैनी, इलाहाबाद में हुआ। आपके पिता स्व॰ प्रो॰ पं॰ रामकुबेर मालवीय (भूतपूर्व साहित्य विभागाध्यक्ष, का॰ हि॰ वि॰ वि॰ और वाराणसेय संस्कृत विश्वविद्यालय) थे जो आपके आद्यगुरू भी हैं। डॉ॰ सुधाकर मालवीय ने काशी हिन्दु विश्वविद्यालय से एम॰ ए॰ संस्कृत, तथा पी॰ एच्॰ डी॰ की उपाधी प्राप्त की और सम्पूर्णानन्द संस्कृत विश्वविद्यालय, वाराणसी से साहित्याचार्य की उपाधि प्राप्त की।

आपकी वैदिक कृतियों में - १. ऐतरेय ब्राह्मण, सायण भाष्य एवं हिन्दी व्याख्या सहित, दो भागों में (उत्तर प्रदेश संस्कृत अकादमी द्वारा पुरस्कृत), २. पारस्कर गृह्यसूत्र, हरिहर गदाहर भाष्य एवं हिन्दी व्याख्या सहित, ३. ऋग्वेद : (प्रथमाष्टक), अन्वितार्थप्रकाशिका हिन्दी व्याख्या सहित, सहलेखक (उत्तरप्रदेश संस्कृत अकादमी द्वारा पुरस्कृत) ४. गोभिलगृह्यसूत्रम्, संस्कृत हिन्दी टीका सहित।

आपके साहित्यक ग्रन्थों में - १. कर्णभार, भास कृत, (उत्तर प्रदेश संस्कृत अकादमी द्वारा पुरस्कृत), २. स्वप्नवासदत्तम्, ३. मधयमव्यायोग, ४. दूतवाक्य, ५. यज्ञफलम्, भास कृत, ६. दशकरूपकम्, धनिक कृत अवलोक एवं हिन्दी व्याख्या सहित (उत्तर प्रदेश संस्कृत अकादमी द्वारा पुरस्कृत), ७. अभिज्ञानशाकुन्तलम्, कालिदास कृत, ८. पञ्चतन्त्रम्, विष्णु शर्मा कृत, संस्कृत-हिन्दी व्याख्या सहित, ९. अमरकोश (प्रथम काण्ड) हिन्दी टीका सहित, १०. उदारराघवम्, कल्याणमल्ल कृत, अज्ञात कर्तृक संस्कृत टीका सहित (सम्पादित)। ११. नाट्यशास्त्रम्, भरतमुनि कृत (बड़ौदानुसारी मूल एवं श्लोकार्धानुक्रमणी सहित)।

आपके तन्त्र ग्रन्थों में - १. क्रमदीपिका, केशव काश्मीरिक कृत, गोविन्द कृत संस्कृत टीका एवं हिन्दी सहित, (उत्तर प्रदेश संस्कृत अकादमी द्वारा पुरस्कृत) २. माहेश्वरतन्त्रम्, हिन्दी टीका सहित, ४. रुद्रयामलम् (उत्तरतन्त्रम्), हिन्दी व्याख्या सहित, ५. कर्पूरस्तव, महाकाल कृत, हिन्दी व्याख्या सहित।

इसके अतिरिक्त आपकी निबन्ध रचनाओं में - १.डिफरेन्ट इन्टरप्रेटेशन्स आफ दि ऋ॰ मंत्र 'चत्वारि शृंगा:' और २. हंसः शुचिषत्, मन्त्र की विभिन्न व्याख्याएँ हैं।

डॉ० सुधाकर मालवीय

मन्त्रमहोदधिः

नौका संस्कृत टीका अरित्र हिन्दी व्याख्या सहितः



चौखम्बा संस्कृत प्रतिष्ठान

दिल्ली

तन्त्रशास्त्र के महत्वपूर्ण प्रकाशन :

आयुधों का पूजन करना चाहिए । इस प्रकार पाँच आवरणों के साथ गणेश जी का पूजन करना चाहिए । मन्त्र सिद्धि के लिए पुरश्चरण के पूर्व पूर्वोक्त पञ्चावरण की पूजा आवश्यक है ॥ १५-१८ ॥

विमर्श - प्रयोग विधि - पीठपूजा करने के बाद उस पर निम्नलिखित मन्त्रों से गणेशमन्त्र की नौ शक्तियों का पूजन करना चाहिए ।

पूर्व आदि आठ दिशाओं में यथा -

ॐ तीव्रायै नमः, ॐ चालिन्यै नमः, ॐ नन्दायै नमः,
ॐ भोगदायै नमः, ॐ कामरूपिण्यै नमः, ॐ उग्रायै नमः,
ॐ तेजोवत्यै नमः, ॐ सत्यायै नमः,

इस प्रकार आठ दिशाओं में पूजन कर मध्य में 'विघ्ननाशिन्यै नमः' फिर 'ॐ सर्वशक्तिकमलासनाय नमः' मन्त्र से आसन देकर मूल मन्त्र से गणेशजी की मूर्ति की कल्पना कर तथा उसमें गणेशजी का आवाहन कर पाद्य एवं अर्घ्य आदि समस्त उपचारों से उनका पूजन कर आवरण पूजा करनी चाहिए ।

ॐ गां हृदयाय नमः आग्नेये, ॐ गीं शिरसे स्वाहा नैर्ऋत्ये,
ॐ गूं शिखायै वषट् वायव्ये, ॐ गैं कवचाय हुम् ऐशान्ये,
ॐ गौं नेत्रत्रयाय वौषट् अग्रे, ॐ गः अस्त्राय फट् चतुर्दिक्षु ।

इन मन्त्रों से षडङ्गपूजा कर पुष्पाञ्जलि लेकर मूल मन्त्र का उच्चारण कर 'अभीष्टसिद्धिं मे देहि शरणागतवत्सले । भक्तया समर्पये तुभ्यं **प्रथमावरणार्चनम्**' कह कर पुष्पाञ्जलि समर्पित करे । फिर -

ॐ विद्यायै नमः पूर्वे, ॐ विधात्र्यै नमः आग्नेये,
ॐ भोगदायै नमः दक्षिणे, ॐ विघ्नघातिन्यै नमः नैर्ऋत्यै,
ॐ निधि प्रदीपायै नमः पश्चिमे, ॐ पापघ्न्यै नमः वायव्ये,
ॐ पुण्यायै नमः सौम्ये, ॐ शशिप्रभायै नमः ऐशान्ये

इन शक्तियों का पूर्वादि आठ दिशाओं में क्रमेण पूजन करना चाहिए । फिर पूर्वोक्त मूल मन्त्र के साथ 'अभीष्टसिद्धिं मे देहि ... से **द्वितीयावरणार्चनम्**' पर्यन्त मन्त्र बोल कर पुष्पाञ्जलि समर्पित करनी चाहिए । तदनन्तर अष्टदल कमल में -

ॐ वक्रतुण्डाय नमः, ॐ एकदंष्ट्राय नमः, ॐ महोदराय नमः,
ॐ गजास्याय नमः, ॐ लम्बोदराय नमः, ॐ विकटाय नमः,
ॐ विघ्नराजाय नमः, ॐ धूम्रवर्णाय नमः

इन मन्त्रों से वक्रतुण्ड आदि का पूजन कर मूलमन्त्र के साथ 'अभिष्टसिद्धिं मे देहि ... से **तृतीयावरणार्चनम्**' पर्यन्त मन्त्र पढ़ कर तृतीय पुष्पाञ्जलि समर्पित करनी चाहिए ।

तत्पश्चात् अष्टदल के अग्रभाग में - ॐ इन्द्राय नमः पूर्वे,
ॐ अग्नये नमः आग्नये, ॐ यमाय नमः दक्षिणे, ॐ निर्ऋतये नमः नैर्ऋत्ये,
ॐ वरुणाय नमः पश्चिमे, ॐ वायवे नमः वायव्ये, ॐ सोमाय नमः उत्तरे,
ॐ ईशानाय नमः ऐशान्ये, ॐ ब्रह्मणे नमः आकाशे, ॐ अनन्ताय नमः पाताले

काम्यप्रयोगसाधनम्

ततः सिद्धे मनौ काम्यान् प्रयोगान् साधयेन्निजान्।
ब्रह्मचर्यरतो मन्त्री जपेद् रविसहस्त्रकम् ॥ १६ ॥
षण्मासमध्याद्दारिद्र्यं नाशयत्येव निश्चितम्।
चतुर्थ्यादिचतुर्थ्यन्तं जपेद्दशसहस्त्रकम् ॥ २० ॥
प्रत्यहं जुहुयादष्टोत्तरं शतमतन्द्रितः।
पूर्वोक्तं फलमाप्नोति षण्मासाद्भक्तितत्परः ॥ २१ ॥
आज्याक्तान्नस्य होमेन भवेद्धनसमृद्धिमान्।
पृथुकैर्नारिकेलैर्वा मरिचैर्वा सहस्त्रकम् ॥ २२ ॥
प्रत्यहं जुह्वतो मासाज्जायते धनसञ्चयः।
जीरसिन्धुमरीचाक्तैरष्टद्रव्यैः सहस्त्रकम् ॥ २३ ॥

प्रयोगानाह – **ब्रह्मेति** ॥ १६–२४ ॥

इन मन्त्रों से दश दिक्पालों की पूजा कर मूल मन्त्र पढते हुए 'अभिष्टसिद्धिं ... से **चतुर्थावरणार्चनम्**' पर्यन्त मन्त्र पढ कर चतुर्थपुष्पाञ्जलि समर्पित करे ।

तदनन्तर अष्टदल के अग्रभाग के अन्त में

ॐ वज्राय नमः, ॐ शक्तये नमः, ॐ दण्डाय नमः,
ॐ खड्गाय नमः, ॐ पाशााय नमः,ॐ अंकुशाय नमः,
ॐ गदायै नमः, ॐ त्रिशूलाय नमः, ॐ चक्राय नमः, ॐ पद्माय नमः

इन मन्त्रों से दशदिक्पालों के वज्रादि आयुधों की पूजा कर मूलमन्त्र के साथ 'अभीष्टसिद्धिं... से ले कर **पञ्चमावरणार्चनम्**' पर्यन्त मन्त्र पढ कर पञ्चम पुष्पाञ्जलि समर्पित करनी चाहिए । इसके पश्चात् २.७ श्लोक में कही गई विधि के अनुसार ६ लाख जप, दशांश हवन, दशांश अभिषेक, दशांश ब्राह्मण भोजन कराने से पुरश्चरण पूर्ण होता है और मन्त्र की सिद्धि हो जाती है ॥ १५-१८ ॥

इसके बाद मन्त्र सिद्धि हो जाने पर काम्य प्रयोग करना चाहिए - यदि साधक ब्रह्मचर्य व्रत का पालन करते हुये प्रतिदिन १२ हजार मन्त्रों का जप करे तो ६ महीने के भीतर निश्चितरूप से उसकी दरिद्रता विनष्ट हो सकती है । एक चतुर्थी से दूसरी चतुर्थी तक प्रतिदिन दश हजार जप करे और एकाग्रचित्त हो प्रतिदिन एक सौ आठ आहुति देता रहे तो भक्तिपूर्वक ऐसा करते रहने से ६ मास के भीतर पूर्वोक्त फल (दरिद्रता का विनाश) प्राप्त हो जाता है ॥ १९-२१ ॥

घृत मिश्रित अन्न की आहुतियाँ देने से मनुष्य धन धान्य से समृद्ध हो जाता है । चिउड़ा अथवा नारिकेल अथवा मरिच से प्रतिदिन एक हजार आहुति देने से एक महीने के भीतर बहुत बड़ी सम्पत्ति प्राप्त होती है । जीरा, सेंधा नमक एवं काली मिर्च से मिश्रित

जुह्वन्प्रतिदिनं पक्षात् स्यात् कुबेर इवार्थवान् ।
चतुःशतं चतुश्चत्वारिंशदाढ्यं दिनेदिने ॥ २४ ॥
तर्पयेन् मूलमन्त्रेण मण्डलादिष्टमाप्नुयात् ।

मन्त्रान्तरकथनम्

अथ मन्त्रान्तरं वक्ष्ये साधकानां निधिप्रदम् ॥ २५ ॥
रायस्पोषभृगुर्याढ्यो ददितामेषसात्वतौ ।
सदृशौ दोरत्नधातुमान् रक्षो गगनं रतिः ॥ २६ ॥
ससद्या बलशार्ङ्गी खं नोषडक्षरसंयुतः ।

अभीष्टप्रदायकएकत्रिंशद्वर्णात्मको मन्त्रः

[1]एकत्रिंशद्वर्णयुक्तो मन्त्रोऽभीष्टप्रदायकः ॥ २७ ॥
सायकैस्त्रिभिरष्टाभिश्चतुर्भिः पञ्चभी रसैः ।
मन्त्रोत्थितैः क्रमाद्वर्णैः षडङ्गं समुदीरितम् ॥ २८ ॥

मण्डलादेकोनपञ्चाशद्दिनमध्ये इष्टं प्राप्नुयात् ॥ २५ ॥ मन्त्रान्तरमाह – **रायस्पोषेति** । स्वरूपं भृगुः सः । याढ्यो यकारयुतः । मेषो न् सात्वतो ध् । तौ सदृशौ इयुतौ । गगनं हः । रतिर्णः । ससद्या ओयुताः । शार्ङ्गी गः । खं हः अन्यत्स्वरूपम् । षडक्षरः पूर्वोक्तः यथा – 'रायस्पोषस्य ददिता निधि दोरत्नधातुमान् **रक्षोहणो बलगहनो वक्रतुण्डाय हुम्**' इत्येकत्रिंशद्वर्णः ॥ २६–२७ ॥ *॥ २८ ॥

अष्टद्रव्यों से प्रतिदिन एक हजार आहुति देने से व्यक्ति एक ही पक्ष (१५ दिनों) में कुबेर के समान धनवान् हो जाता है । इतना ही नहीं प्रतिदिन मूलमन्त्र से ४४४ बार तर्पण करने से मनुष्यों को मनो वाञ्छित फल की प्राप्ति हो जाती है ॥ २२-२५ ॥

अब साधकों के लिए **निधिप्रदान करने वाले अन्य मन्त्र** को बतला रहा हूँ ॥ २५ ॥

'रायस्पोष' शब्द के आगे भृगु (स) जो 'य' से युक्त हो (अर्थात् स्य), फिर 'ददिता', पश्चात् इकार युक्त मेष (नि) तथा इकार युक्त ध (धि) (निधि), तत्पश्चात् 'दो रत्नधातुमान् रक्षो' तदनन्तर गगन (ह), सद्य (ओ) से युक्त रति (ण) (अर्थात् हणो), फिर 'बल' तथा शार्ङ्गी (ग) खं (ह), तदनन्तर 'नो' फिर अन्त में षडक्षर मन्त्र (वक्रतुण्डाय हुम्) लगाने से ३१ अक्षरों का मन्त्र बन जाता है, जो मनोवाञ्छित फल प्रदान करता है ॥ २६-२७ ॥

विमर्श - मन्त्र का स्वरूप इस प्रकार है - 'रायस्पोषस्य ददिता निधिदो रत्नधातुमान् रक्षोहणो बलगहनो वक्रतुण्डाय हुम्' ॥ २६-२७ ॥

इस मन्त्र के क्रमशः ५, ३, ८, ४, ५, एवं षडक्षरों से षडङ्गन्यास कहा गया है । इसके ऋषि,

---

१. रायस्पोषस्य ददिता निधिदो रत्नधातुमान् रक्षोहणो वलगहनो वक्रतुण्डाय हुम्।

ऋष्याद्यर्चाप्रयोगाः स्युः पूर्ववन्निधिदो ह्ययम् ।

षडक्षरोऽपरोमन्त्रः

पद्मनाभयुतो [1]भानुर्मेघासद्यसमन्विता ॥ २६ ॥
लकावनन्तमारूढौ वायुः पावकमोहिनी ।
षडक्षरोऽयमादिष्टो भजतामिष्टदो मनुः ॥ ३० ॥
पूर्ववत् सर्वमेतस्य समाराधनमीरितम् ।

नवाक्षरो मन्त्रः

लकुलीदृशमारूढौ भृगुतौ लोहितः सदृक् ॥ ३१ ॥

पूर्ववत् षड्वर्णवत् ॥ २६ ॥ मन्त्रान्तरमाह – **पद्मेति** । भानुर्मः । पद्मनाभ ए । तद्युतः मे घाघः । सद्य ओ । तद्युतालकौ लकारककारौ । अनन्तमाकारमारूढौ । वायुर्यः । पावकगेहिनी स्वाहा । मेघोल्काय स्वाहेति षड्वर्णः ॥ ३० ॥ मन्त्रान्तरमाह – **लकुलीति** । लकुली हकारः । भृगुतौ सकारतकारौ दृशमारूढौ इकारयुतौ तेनस्ति । लोहितः पः सदृक्इयुतः । वकः शः। सदीर्घः आयुतः । च स्वरूपम् । साक्षी इयुतः । लिखे स्वरूपं शिरोन्तिमः स्वाहान्तः। हस्तिपिशाचि लिखे स्वाहेति नवार्णः ॥ ३१–३२ ॥

छन्द, देवता, तथा पूजन का प्रकार पूर्ववत् है; यह मन्त्र निधि प्रदान करता है ॥ २८-२६ ॥

विमर्श - विनियोग की विधि - अस्य श्रीगणेशमन्त्रस्य भार्गवऋषिः अनुष्टुप्छन्दः गणेशो देवता वं बीजं यं शक्तिः अभीष्टसिद्धये जपे विनियोगः ।

ऋष्यादिन्यास की विधि - भार्गवऋषये नमः शिरसि, अनुष्टुप्छन्दसे नमः मुखे, गणेशदेवतायै नमः हृदि, वं बीजाय नमः गुह्ये, यं शक्तये नमः पादयोः ।

करन्यास एवं षडङ्गन्यास की विधि - रायस्पोषस्य अङ्गुष्ठाभ्यां नमः, ददिता तर्जनीभ्यां नमः, निधिदो रत्नधातुमान् मध्यमाभ्यां नमः, रक्षोहणो अनामिकाभ्यां नमः, बलगहनो कनिष्ठिकाभ्यां नमः, वक्रतुण्डाय हुं करतलकरपृष्ठाभ्यां नमः, इसी प्रकार हृदयादि स्थानों में षडङ्गन्यास करना चाहिए ।

तदनन्तर पूर्वोक्त - २. ६ श्लोक द्वारा ध्यान करना चाहिए ।

इस मन्त्र की भी जपसंख्या ६ लाख है । नित्यार्चन एवं हवन विधि पूर्ववत् (२. ७-१६) विधि से करना चाहिए ॥ २८-२६ ॥

गणेश जी का अन्य **षडक्षर मन्त्र** इस प्रकार है -

पद्मनाभ (ए) से युक्त भानु म (मे), सद्य (ओ) के सहित घ (घो), दीर्घ आकार के सहित ल् और ककार (ल्का) फिर वायु (य) और अन्त में पावकगेहिनी (स्वाहा)

---

१. मेघोल्काय स्वाहा ।

वकः सदीर्घश्चः साक्षिर्लिखेन्मन्त्रः शिरोन्तिमः ।
नवाक्षरो[1] मनुश्चास्य कङ्कोलः परिकीर्तितः ॥ ३२ ॥
विराट्छन्दो देवता तु स्याद्वै चोच्छिष्टनायकः ।

पञ्चाङ्गन्यासकथनम्

द्वाभ्यां त्रिभिर्द्वयेनाथ द्वाभ्यां सकलमन्त्रतः ॥ ३३ ॥
पञ्चाङ्गान्यस्य कुर्वीत ध्यायेत्तं [2]शशिशेखरम् ।

उच्छिष्टविनायकध्यानम्

चतुर्भुजं रक्ततनुं त्रिनेत्रं
पाशांकुशौ मोदकपात्रदन्तौ ।
करैर्दधानं सरसीरुहस्थ-
मुन्मत्तमुच्छिष्टगणेशमीडे ॥ ३४ ॥

पञ्चाङ्गमाह – **द्वाभ्यामिति** । हस्तिहृदयाय नम इत्यादि ॥ ३३ ॥ ध्यानमाह – **चतुर्भुजमिति** । अंकुशमोदकपात्रे दक्षयोः अन्ययोरन्ये ॥ ३४–३६ ॥

लगाने से निष्पन्न होता है यह षडक्षर मन्त्र साधक के लिए सर्वाभीष्टप्रदाता कहा गया है । पुरश्चरण, अर्घ तथा होमादि का विधान पूर्ववत् (२. ७-२०) है ॥ २६-३१ ॥

विमर्श – इस षडक्षर **मन्त्र का स्वरूप** इस प्रकार है – 'मेघोल्काय स्वाहा' ॥ ३१॥

अब **उच्छिष्ट गणपति मन्त्र** का उद्धार कहते हैं – लकुली (ह) 'इ' के साथ भृगु (स) एवं त अर्थात् 'स्ति' सदृक 'इ' के सहित लोहित 'प' अर्थात् पि, दीर्घ के सहित वक (श) अर्थात् 'शा' साक्षि 'इ' से युक्त च (चि), फिर लिखे अन्त में शिर (स्वाहा) लगाने से नवाक्षर मन्त्र निष्पन्न होता है ॥ ३१-३२ ॥

विमर्श – मन्त्र का स्वरूप – 'ॐ हस्ति पिशाचि लिखे स्वाहा' ॥ ३१-३२ ॥

१. ह्रीं त्रीं (स्त्रीं) हुं अं इं उं ऋं लृं एं ओं अं ललाट पूर्वे इन्द्राय नमः॥ १॥ ह्रीं त्रीं (स्त्रीं) हुं आं ईं ऊं ॠं लॄं ऐं औं अः ललाटाग्नेय्यां अग्नये नमः॥ २॥ ह्रीं त्रीं (स्त्रीं) हुं कं खं गं घं ङं ललाटदक्षिणे यमाय नमः ॥ ३॥ ह्रीं त्रीं (स्त्रीं) हुं चं छं जं झं ञं लालाटनैऋत्यां निर्ऋतये नमः ॥ ४॥ ह्रीं त्रीं (स्त्रीं) हुं टं ठं डं ढं णं ललाटपश्चिमायां वरुणाय नमः ॥ ५॥ ह्रीं त्रीं (स्त्रीं)

(३) दिक्पालन्यासः

तृतीयं लोकपालानां[१] न्यासं कुर्यात् प्रयत्नतः।
मायादिबीजत्रितयपूर्वकं सर्वसिद्धये॥ १६॥
स्वमस्तके ललाटादौ दशदिक्ष्वध ऊर्ध्वतः।
ह्रस्वदीर्घकादिकाष्टवर्गपूर्वान्दिशाधिपान् ॥ १७॥
शिवशक्त्याभिधन्यासं चतुर्थं[१] तु समाचरेत्।

लोकपालन्यास करना चाहिए । सर्वसिद्धियाँ प्राप्त करने के लिए आरम्भ में माया बीजादि तीन बीज, तदनन्तर ह्रस्व दीर्घ स्वरों का क्रमशः न्यास अपने मस्तक के ललाटादि प्रथम दो स्थानों और दो दिशाओं में, तदनन्तर आठ दिशाओं में आठ कवर्गादि वर्णो का न्यास करना चाहिए ॥ १६-१७ ॥

लोकपालन्यास विधि -

ह्रीं त्रीं (स्त्रीं) हुं अं इं उं ऋं लृं एं ओं अं ललाटपूर्वे इन्द्राय नमः ।
ह्रीं त्रीं (स्त्रीं) हुं आं ईं ऊं ॠं ॡं ऐं औं अः ललाटाग्नेय्यां अग्नये नमः ।
ह्रीं त्रीं (स्त्रीं) हुं कं खं गं घं ङं ललाटदक्षिणे यमाय नमः ।
ह्रीं त्रीं (स्त्रीं) हुं चं छं जं झं ञं लालाटनैऋत्यां निर्ऋतये नमः ।
ह्रीं त्रीं (स्त्रीं) हुं टं ठं डं ढं णं ललाटपश्चिमायां वरुणाय नमः
ह्रीं त्रीं (स्त्रीं) हुं तं थं दं धं नं ललाट वायव्यां वायवे नमः ।
ह्रीं त्रीं (स्त्रीं) हुं पं फं बं भं मं ललाटोत्तरस्यां सोमाय नमः ।
ह्रीं त्रीं (स्त्रीं) हुं यं रं लं वं ललाटैशान्यां ईशानाय नमः ।
ह्रीं त्रीं (स्त्रीं) हुं शं षं सं हं ललाटोर्ध्वायां ब्रह्मणे नमः ।
ह्रीं त्रीं (स्त्रीं) हुं लं क्षं ललाटाधोदिशि अनन्ताय नमः ।

॥ **इति लोकपालन्यासः तृतीयः** ॥ १६-१७ ॥

लोकपालन्यास के अनन्तर शिव शक्ति संज्ञक चतुर्थ न्यास करना

हुं तं थं दं धं नं ललाटवायव्यां वायवे नमः॥ ६॥ ह्रीं त्रीं (स्त्रीं) हुं पं फं बं भं मं ललाटोत्तरस्यां सोमाय नमः॥ ७॥ ह्रीं त्रीं (स्त्रीं) हुं यं रं लं वं ललाटैशान्यां ईशानाय नमः॥ ८॥ ह्रीं त्रीं (स्त्रीं) हुं शं षं सं हं ललाटोर्ध्वायां ब्रह्मणे नमः॥ ९॥ ह्रीं त्रीं (स्त्रीं) हुं लं क्षं ललाटाधोदिशि अनन्ताय नमः॥ १०॥ ॥ **इति लोकपालन्यासः तृतीयः** ॥

१. ॐ ह्रीं त्रीं (स्त्री) हुं वं शं षं सं डाकिनीयुत ब्रह्माणं चतुर्दलसमन्वित मूलाधारे न्यसेत् ॥ १॥ ॐ ह्रीं त्रीं (स्त्रीं) हुं बं भं मं यं रं लं राकिनीयुत श्रीविष्णुलिंगस्य षड्दले स्वाधिष्ठानचक्रे न्यसेत्॥ २॥ ॐ ह्रीं त्रीं (स्त्रीं) हुं डं ढं णं तं थं दं धं नं पं फं लाकिनीयुत रुद्रं दशदलचक्र-नाभिस्थे मणिपूरके न्यसेत्॥ ३॥ ॐ ह्रीं त्रीं (स्त्रीं) हुं कं खं गं घं ङं चं छं जं झं ञं टं ठं काकिनी युतमीश्वरम् अनाहते द्वादशदले चक्रे हृदि न्यसेत् ॥ ४॥ ॐ ह्रीं त्रीं (स्त्रीं) हुं अं आं इं ईं उं ऊं ऋं ॠं लृं ॡं एं ऐं ओं औं अं अः शाकिनी युत सदाशिवं विशुद्धाख्य षोडशदले कण्ठस्थे विन्यसेत् ॥ ५॥ ॐ ह्रीं त्रीं (स्त्रीं) हुं लं (हं) क्षं हाकिनीयुतं परशिवमाज्ञाचक्रे मनोहरे भ्रूमध्यसंस्थिते विन्यसेत् ॥ ६॥ ॥ **इति शिवशक्तिन्यास चतुर्थः** ॥

त्रिबीजपूर्वकान्न्यस्येत् षट्शिवाञ्छक्तिसंयुतान् ॥ १८ ॥
आधारादिषु चक्रेषु चक्रस्थाक्षरपूर्वकान् ।
ब्रह्माणं डाकिनीयुक्तं वादिसान्तार्णभूषितम् ॥ १९ ॥
मूलाधारे प्रविन्यस्येच्चतुर्दलसमन्विते ।
श्रीविष्णुं राकिनीयुक्तवादिलान्तार्णपूर्वकम् ॥ २० ॥
स्वाधिष्ठानाभिधे चक्रे लिङ्गस्थे षड्दले न्यसेत् ।
रुद्रं तु लाकिनीयुक्तं डादिफान्तार्णपूर्वकम् ॥ २१ ॥
चक्रे दशदले न्यस्येन्नाभिस्थे मणिपूरके ।
ईश्वरं कादिठान्तार्णपूर्वकं काकिनीयुतम् ॥ २२ ॥
विन्यसेद् द्वादशदले हृदयस्थे त्वनाहते ।
सदाशिवं शाकिनीं च षोडशस्वरपूर्वकम् ॥ २३ ॥

चाहिए । प्रारम्भ में पूर्वोक्त तीनों बीजों को लगाकर फिर चक्रस्थ वर्ण, फिर अपनी अपनी शक्तियों के साथ ६ शिवों को क्रमशः मूलाधार आदि ६ चक्रों में न्यस्त करना चाहिए । उसकी विधि इस प्रकार है - चार दल वाले मूलाधार चक्र पर वकारादि (व श ष स) चार वर्णों के साथ डाकिनी सहित द्वितीयान्त १. **'ब्रह्मदेव'** को न्यस्त करना चाहिए । तदनन्तर लिङ्गस्थान स्थित ६ दलों वाले स्वाधिष्ठान चक्र में बकारादि ६ वर्णों से राकिनी सहित द्वितीयान्त २. **'विष्णु'** का, तदनन्तर नाभि देश में स्थित दशदल वाले मणिपूर चक्र में डकार से लेकर फकारान्त वर्ण पर्यन्त लाकिनी सहित द्वितीयान्त ३. **'रुद्र'** का, तदनन्तर हृदयस्थ द्वादश दल वाले अनाहतचक्र में क से ठ पर्यन्त वर्णों का तथा काकिनी सहित द्वितीयान्त ४. **'ईश्वर'** का न्यास करना चाहिए । इसी प्रकार कण्ठ स्थान में स्थित १६दल वाले विशुद्ध चक्र में १६ स्वरों के साथ शाकिनी सहित द्वितीयान्त ५. **'सदाशिव'** का तथा भ्रूमध्य स्थित दो दल वाले आज्ञाचक्र में 'ल' 'क्ष' वर्णों के साथ हाकिनी सहित द्वितीयान्त ६. **परशिव** का न्यास करना चाहिए ॥ १८-२४ ॥

विमर्श - इस न्यास की विधि इस प्रकार है -

ॐ ह्रीं त्रीं (स्त्रीं) हुं वं शं षं सं डाकिनीसहितब्रह्मणे नमः मूलाधारे ।

ॐ ह्रीं त्रीं (स्त्रीं) हुं बं भं मं यं रं लं राकिनीसहितविष्णवे नमः स्वाधिष्ठाने ।

ॐ ह्रीं त्रीं (स्त्रीं) हुँ डं ढं णं तं थं दं धं नं पं फं लाकिनीसहितरुद्राय नमः मणिपूरके ।

ॐ ह्रीं त्रीं (स्त्रीं) हुं कं खं गं घं ङं चं छं जं झं ञं टं ठं काकिनीसहिताय ईश्वराय नमः अनाहते ।

कण्ठस्थे षोडशदले विशुद्धाख्ये प्रविन्यसेत् ।
आज्ञाचक्रे परशिवहाकिनीसंयुतं जपेत् ॥ २४ ॥
लक्षार्णपूर्वं भ्रूमध्ये संस्थितेति मनोहरे ।
तारादिपञ्चमं न्यासं[1] कुर्यात्सर्वेष्टसिद्धये ॥ २५ ॥
अष्टौ वर्गान्स्वरद्वन्द्व–पूर्वकान् बीजसंयुतान् ।
पूर्वं प्रयोज्य ताराद्यान्यस्तव्या अष्टमूर्तयः ॥ २६ ॥
तारा उग्रा महोग्रापि वज्रा काली सरस्वती ।
कामेश्वरी च चामुण्डा इत्यष्टौ तारिकाः स्मृताः ॥ २७ ॥
ब्रह्मरन्ध्रे ललाटे च भ्रूमध्ये कण्ठदेशतः ।
हृदि नाभौ लिगमूले मूलाधारे क्रमान्न्यसेत् ॥ २८ ॥

ॐ ह्रीं त्रीं (स्त्रीं) हुं अं आं इं ईं उं ऊं ऋं ॠं ऌं ॡं एं ऐं ओं औं अं अः शाकिनीसहितसदाशिवाय नमः विशुद्धाख्ये ।

ॐ ह्रीं त्रीं (स्त्रीं) हुं लं (हं) क्षं हाकिनीसहितपरशिवाय नमः आज्ञाचक्रे ।

॥ **इति शिवशक्तिन्यासः चतुर्थः** ॥ १८–२४ ॥

तत्पश्चात् अपनी अभीष्ट सिद्धि के निमित्त तारादि पञ्चम न्यास करना चाहिए । पूर्वोक्त तीन बीजों के अनन्तर दो दो स्वर, तदनन्तर क्रमशः उसके आगे एक एक वर्ग, तदनन्तर तारा आदि अष्ट मूर्त्तियों को क्रमशः ब्रह्मरन्ध्र, ललाट, भ्रूमध्य, कण्ठ, हृदय, नाभि, लिङ्गमूल एवं मूलाधार में न्यास करना चाहिए । १. तारा, २. उग्रा, ३. महोग्रा, ४. वज्रा, ५. काली, ६. सरस्वती, ७. कामेश्वरी तथा ८. चामुण्डा – ये तारा आदि अष्ट मूर्तियाँ कही गईं हैं ॥ २५–२८ ॥

विमर्श – इसकी **विधि** इस प्रकार है –

ॐ ह्रीं त्रीं (स्त्रीं) हुं अं आं कं खं गं घं ङं तारायै नमः, ब्रह्मरन्ध्रे ।
ॐ ह्रीं त्रीं (स्त्रीं) हुं इं ईं चं छं जं झं ञं उग्रायै नमः, ललाटे ।
ॐ ह्रीं त्रीं (स्त्रीं) हुं उं ऊं टं ठं डं ढं णं महोग्रायै नमः, भ्रमूध्ये ।
ॐ ह्रीं त्रीं (स्त्रीं) हुं ऋं ॠं तं थं दं घं नं वज्रायै नमः, कण्ठदेशे ।
ॐ ह्रीं त्रीं (स्त्रीं) हुं ऌं ॡं पं फं बं भं मं महाकाल्यै नमः, हृदि ।

---

१. ॐ ह्रीं त्रीं (स्त्रीं) हुं अं आं कं खं गं घं ङं तारायै नमः ब्रह्मरन्ध्रे ॥ १॥ ॐ ह्रीं त्रीं (स्त्रीं) हुं इं ईं चं छं जं झं ञं उग्रायै नमः ललाटे ॥ २॥ ॐ ह्रीं त्रीं (स्त्रीं) हुं उं ऊं टं ठं डं ढं णं महोग्रायै नमः भ्रमूध्ये ॥ ३॥ ॐ ह्रीं त्रीं (स्त्रीं) हुं ऋं ॠं तं थं दं घं नं वज्रायै नमः कण्ठदेशे ॥ ४॥ ॐ ह्रीं त्रीं (स्त्रीं) हुं लं ॡं पं फं बं भं मं महाकाल्यै नमः हृदि ॥ ५॥ ॐ ह्रीं त्रीं (स्त्रीं) हुं एं ऐं यं रं लं वं सरस्वत्यै नमः नाभौ ॥ ६॥ ॐ ह्रीं त्रीं (स्त्रीं) हुं ओं औं शं षं सं हं कामेश्वर्यै नमः लिङ्गमूले ॥ ७॥ ॐ ह्रीं त्रीं (स्त्रीं) हुं अं अः लं क्षं चामुण्डायै नगः मूलाधारे ॥ ८॥ ॥ इति तारादिन्यासः ॥

षष्ठंन्यासं[1] ततः कुर्यात्पीठाख्यं सर्वसिद्धिदम् ।
आधारे कामरूपाख्यं ह्रस्वबीजार्णपूर्वकम् ॥ २९ ॥
हृदि जालन्धरं पीठं दीर्घपूर्वं प्रविन्यसेत् ।
ललाटे पूर्णगिर्याख्यं कवर्गाढ्यं न्यसेत्सुधीः ॥ ३० ॥
उड्डियानं चवर्गाद्यं केशसन्धौ प्रविन्यसेत् ।
भ्रुवोर्वाराणसीपीठं टवर्गाद्यं समाहितः ॥ ३१ ॥
तवर्गपूर्विकां न्यस्येदवन्तीं नयनद्वये ।
पवर्गपूर्वकं मायापुरीपीठं मुखे न्यसेत् ॥ ३२ ॥
कण्ठे तु मथुरापीठं यवर्गाद्यं प्रविन्यसेत् ।
अयोध्यापीठकं नाभौ शवर्गादिकमुत्तमम् ॥ ३३ ॥
कट्योः काञ्चीपुरीपीठं दशमं तु प्रविन्यसेत् ।
षोढान्यासास्तु तारायाः प्रोक्तास्ते इष्टदायकाः ॥ ३४ ॥

ॐ ह्रीं त्रीं (स्त्रीं) हुं एं ऐं यं रं लं वं सरस्वत्यै नमः, नाभौ ।
ॐ ह्रीं त्रीं (स्त्रीं) हुं ओं औं शं षं सं हं कामेश्वर्यै नमः, लिङ्गमूले ।
ॐ ह्रीं त्रीं (स्त्रीं) हुं अं अः लं क्षं चामुण्डायै नमः, मूलाधारे ।

॥ इति तारादिन्यासः ॥ २५-२८ ॥

अब साधकों को शीघ्र सिद्धि प्रदान करने वाले **षष्ठ पीठन्यास की विधि** कहते हैं -

आधार में बीजत्रितय सहित ह्रस्वस्वरों के साथ कामरूप पीठ का, हृदय में पूर्वबीजों के सहित दीर्घस्वरों का उच्चारण कर जालन्धर पीठ का, पुनः ललाट में पूर्ववत् तीनों बीजों के आगे कवर्ग का उच्चारण कर पूर्णगिरि संज्ञक पीठ का, केशसन्धियों में पूर्ववत् तीनों बीजों के साथ चवर्ग का उच्चारण कर उड्डीयान पीठ का, फिर दोनों भौहों में पूर्ववत् बीजों के साथ टवर्ग का उच्चारण कर वाराणसी पीठ का, दोनों नेत्रों में तवर्ग के साथ अवन्ति पीठ का, मुख में पवर्ग के साथ मायापुरी पीठ का, कण्ठ में यवर्ग के साथ मथुरा पीठ का, नाभि में शवर्ग के साथ अयोध्या पीठ का, तथा कटि में (ल क्ष के साथ) दशम

---

१. ॐ ह्रीं त्रीं (स्त्रीं) हुं अं इं उं ऋं लृं एं ओं अं कामरूपपीठाय नमः, आधारे । ॐ ह्रीं त्रीं (स्त्रीं) हुं आं ईं ऊं ॠं ॡं ऐं औं अः जालंधरपीठाय नमः, हृदि । ॐ ह्रीं त्रीं (स्त्रीं) हुं कं खं गं घं ङं पूर्णगिरिपीठाय नमः, ललाटे । ॐ ह्रीं त्रीं (स्त्रीं) हुं चं छं जं झं ञं उड्डीयानपीठाय नमः, केशसंघौ । ॐ ह्रीं त्रीं (स्त्रीं) हुं टं ठं डं ढं णं वाराणसीपीठाय नमः, भ्रुवोः । ॐ ह्रीं त्रीं (स्त्रीं) हुं तं थं दं धं नं अवन्तिपीठाय नमः, नेत्रयोः । ॐ ह्रीं त्रीं (स्त्रीं) हुं पं फं बं भं मं मायापुरीपीठाय नमः, मुखे । ॐ ह्रीं त्रीं (स्त्रीं) हुं यं रं लं वं मथुरापीठाय नमः, कण्ठे । ॐ ह्रीं त्रीं (स्त्रीं) हुं शं षं सं हं अयोध्यापीठाय नमः, नाभौ । ॐ ह्रीं त्रीं (स्त्रीं) हुं लं क्षं काञ्चीपुरीपीठाय नमः, कट्याम् ॥ **इति पीठन्यासः** ॥

श्रीमतीं ह्द्येकजटां[1] तारिणीं शिरसि न्यसेत् ।
वज्रोदकां शिखायां तु उग्रतारां तु वर्मणि ॥ ३५ ॥
महापरिसरे नेत्रे पिङ्गोग्रैकजटेऽस्त्रके ।
षड्दीर्घयुक्तमायाद्या एतान्यस्याः षडङ्गके ॥ ३६ ॥
अंगुष्ठादिष्वंगुलीषु पूर्वं विन्यस्य यत्नतः ।
तर्जनीमध्यमाभ्यां तु कृत्वा तालत्रयं ततः ॥ ३७ ॥
छोटिकामुद्रया कुर्याद्दिग्बन्धं देवतां स्मरन् ।
विद्यया तारपुटया व्यापकं सप्तधा चरेत् ।
उग्रां तारां ततो ध्यायेत्सद्योवाक्सिद्धिदायिनीम् ॥ ३८ ॥

काञ्चीपुरी पीठ का न्यास करना चाहिए । यहाँ तक जो तारा के षष्ठ पीठ न्यास कहे गये हैं वे साधकों को सभी प्रकार की सिद्धि प्रदान करते हैं ॥ २९-३४ ॥

विमर्श - षष्ठपीठन्यास विधि -

ॐ ह्रीं त्रीं (स्त्रीं) हुं अं इं उं ऋं लृं एं ओं अं कामरूपपीठाय नमः, आधारे।
ॐ ह्रीं त्रीं (स्त्रीं) हुं आं ईं ऊं ॠं लॄं ऐं औं अः जालन्धरपीठाय नमः, हृदि।
ॐ ह्रीं त्रीं (स्त्रीं) हुं कं खं गं घं ङं पूर्णगिरिपीठाय नमः, ललाटे ।
ॐ ह्रीं त्रीं (स्त्रीं) हुं चं छं जं झं ञं उड्डीयानपीठाय नमः, केशसंधौ ।
ॐ ह्रीं त्रीं (स्त्रीं) हुं टं ठं डं ढं णं वाराणसीपीठाय नमः, भ्रुवोः ।
ॐ ह्रीं त्रीं (स्त्रीं) हुं तं थं दं धं नं अवन्तिपीठाय नमः, नेत्रयोः ।
ॐ ह्रीं त्रीं (स्त्रीं) हुं पं फं बं भं मं मायापुरीपीठाय नमः, मुखे ।
ॐ ह्रीं त्रीं (स्त्रीं) हुं यं रं लं वं मथुरापीठाय नमः, कण्ठे ।
ॐ ह्रीं त्रीं (स्त्रीं) हुं शं षं सं हं अयोध्यापीठाय नमः, नाभौ ।
ॐ ह्रीं त्रीं (स्त्रीं) हुं लं क्षं काञ्चीपुरीपीठाय नमः, कट्याम् ।

॥ इति पीठन्यासः ॥ २९-३४ ॥

मायाबीज में क्रमशः ६ दीर्घवर्णों को आदि में लगाकर क्रमशः एक जटा का हृदय में, तारिणी का शिर में, वज्रोदका का शिखा में, उग्रतारा का कवच में, महापरिसरा का नेत्रों में, तथा पिङ्गोग्रैजटा का अस्त्रन्यास करना चाहिए । इसी प्रकार अङ्गुष्ठादि अङ्गुलियों में करन्यास कर तर्जनी मध्यमा द्वारा तीन ताली बजा कर छोटिका मुद्रा से दिग्बन्धन करना चाहिए । फिर प्रणव से सम्पुटित विद्या (ॐ ह्रीं त्रीं (स्त्रीं) हुं फट् ॐ) द्वारा सात बार व्यापक न्यास कर शीघ्र वाक्सिद्धि प्रदान करने वाली उग्रतारा भगवती का आगे (४.३९-४०) कहे गये श्लोकों में ध्यान करना चाहिए ॥ ३५-३८ ॥

---

१. ॐ ह्रां एकजटायै हृदयाय नमः ॥ १॥ ॐ ह्रीं तारिण्यै शिरसे स्वाहा ॥ २॥ ॐ ह्रूं वज्रोदकायै शिखायै वषट् ॥ ३॥ ॐ ह्रैं उग्रजटायै कवचाय हुम् ॥ ४॥ ॐ ह्रौं महापरिसरायै नेत्रत्रयाय वौषट् ॥ ५॥ ॐ ह्रः पिङ्गोग्रैकजटायै अस्त्राय फट् ॥ ६॥

ताराध्यानम्

विश्वव्यापकवारिमध्यविलसच्छ्वेताम्बुजन्मस्थितां
कर्त्रीखड्गकपालनीलनलिनै राजत्करां नीलभाम्।
काञ्चीकुण्डल–हार–कंकणलसत् केयूरमञ्जीरता–
माप्तैर्नागवरैर्विभूषिततनूमारक्तनेत्रत्रयाम् ॥ ३९ ॥
पिङ्गोग्रैकजटां लसत्सुरसनां दंष्ट्राकरालाननां
चर्मद्वीपिवरं कटौ विदधतीं श्वेतास्थिपट्टालिकाम्।
अक्षोभ्येण विराजमानशिरसं स्मेराननाम्भोरुहां
तारां शावहृदासनां दृढकुचामम्बां त्रिलोक्याः स्मरेत् ॥ ४० ॥

ध्यानमाह – **विश्वेति** । खड्गनीलसरोज दक्षयोः । कर्त्रीकपाले वामयोः ॥ ३९ ॥ श्वेतोऽस्थिपट्टोऽलिके ललाटे यस्यास्ताम् । अक्षोभ्यो मन्त्रद्रष्टा मुनिस्तेन शोभितमस्तकाम् ॥ ४० ॥ * ॥ ४१ ॥

विमर्श - षडङ्गन्यास विधि -

ॐ ह्रां एकजटायै हृदयाय नमः, ॐ ह्रीं तारिण्यै शिरसे स्वाहा,
ॐ ह्रूं वज्रोदकायै शिखायै वषट्, ॐ ह्रैं उग्रजटायै कवचाय हुम्,
ॐ ह्रौं महापरिसरायै नेत्रत्रयाय वौषट्, ॐ ह्रः पिङ्गोग्रैकजटायै अस्त्राय फट्।

इसी प्रकार करन्यास कर पूर्वोक्त रीति से ताली बजाकर व्यापक न्यास करना चाहिए ॥ ३५-३८ ॥

अब **उग्रतारा का ध्यान** कहते हैं -

विश्वव्यापक जल के मध्य में श्वेत कमल पर विराजमान जिन भगवती के दाहिने हाथों में खड्ग एवं नीलकमल तथा बायें हाथों में कर्त्तारिका (छुरी) एवं कपाल (नरमुण्ड) है, जिनके शरीर की कान्ति नील वर्ण की है, तथा जो काञ्ची, कुण्डल, हार, कङ्कण, केयूर तथा मञ्जीर आदि आभूषणों से, एवं सुन्दर नागों से विभूषित हैं, ऐसे रक्त वर्ण वाले तीन नेत्रों से सुशोभित रहने वाली जिन भगवती के सिर पर पिङ्गल वर्ण की एक जटा है । जिनकी जिह्वा चञ्चल है, दन्तपक्तियों के कारण जिनका मुख महाभयानक प्रतीत हो रहा है । जिनके कटि में व्याघ्र चर्म, माथे पर श्वेतास्थिपट्टिका तथा शिर पर नागरूप धारी अक्षोभ्य ऋषि विराज रहे हैं ऐसी ईषद्धास्य से युक्त मुख कमल वाली, शव के हृदय पर आसन लगाये हुये कठोर स्तनों वाली त्रिलोक जननी भगवती तारा का ध्यान करना चाहिए ॥ ३९-४० ॥

हां त्रां हां एकजटायै अङ्गुष्ठाभ्यां नमः॥ १॥ हां त्रां हां तारिण्यै तर्जनीभ्यां स्वाहा॥ २॥ हां त्रां हां वज्रोदकायै मध्यमाभ्यां वषट् ॥ ३॥ हां त्रां हां उग्रतारायै अनामिकाभ्यां हुं ॥ ४॥ हां त्रां हां महापरिसरायै कनिष्ठिकाभ्यां वौषट् ॥ ५॥

एवं ध्यायन्नदन्भक्ष्यमनेकं दधिमध्वपि ।
मधुमांसं च ताम्बूलं जपेल्लक्षचतुष्टयम् ॥ ४१ ॥
दशांशं जुहुयाद् रक्तपद्मैः क्षीराज्यलोलितैः ।
स्थापयित्वा महाशङ्खं जपस्थाने जपं चरेत् ॥ ४२ ॥
नारीं पश्यन्स्पृशन्गाच्छन् महानिशिबलिं ददेत् ।
न कार्यः सुभ्रुवां द्वेषो यत्नात्ताः पूजयेत् सदा ॥ ४३ ॥
जपे न कालनियमो न स्थितौ सर्वदा जपेत् ।
श्माशाने शून्यसदने देवागारेथ निर्जने ॥ ४४ ॥
पर्वते वनमध्ये वा शवमारुह्य मन्त्रवित् ।
समरे शत्रुनिहतं यद्वा षाण्मासिकं शिशुम् ॥ ४५ ॥
विद्यां संसाधयेच्छीघ्रं साधितैवं प्रसिध्यति ।
मेधाप्रज्ञाप्रभाविद्याधीर्धृतिस्मृतिबुद्धयः ॥ ४६ ॥
विद्येश्वरीति सम्प्रोक्ताः पीठस्य नवशक्तयः ।

तारापीठमन्त्रः

भृगुमन्विन्दुसंयुक्तमेघवर्त्मसरस्वती ॥ ४७ ॥

महाशङ्खं कपालम् ॥ ४२ ॥ * ॥ ४३–४६ ॥ पीठमन्त्रमुद्धरति – **भृग्विति** । भृगुमन्विन्दुसंयुक्तं सकारः औबिन्दुयुतम् । मेघवर्त्म हः । हार्दं नमः । स्वरूपम् अन्यत् । हौं सरस्वतीयोगपीठात्मने नम इति ॥ ४७ ॥ * ॥ ४८–४६ ॥

तारा भगवती का ध्यान करते हुये एक हविष्यान्न अथवा अनेक दधि मधु अथवा मधु और मांस खाकर तथा ताम्बूल का चवर्ण करते हुए तारा मन्त्र का चार लाख जप करना चाहिए । तदनन्तर दूध और घी मिलाकर रक्तकमलों से दशांश हवन करना चाहिए । जप स्थान पर महाशंख (नर कपाल) स्थापित कर जप का विधान कहा गया है । स्त्री को देखते हुये स्पर्श करते हुये अथवा चलते हुये निशीथ काल में बलि देनी चाहिए । स्त्रियों से कभी द्वेष नहीं करना चाहिए, अपितु सर्वदा उनका पूजन करना चाहिए ॥ ४१-४३ ॥

तारा मन्त्र के जप में काल एवं स्थान का कोई नियम नहीं है । सर्वदा और सभी जगह जप करना चाहिए । श्मशान में, शून्यगृह में, देवस्थान (मन्दिर) में, एकान्त में, पर्वत पर या वन के मध्य में शव पर बैठकर साधक कहीं भी जप कर सकता है । युद्ध में मारे गये शत्रु अथवा ६ महीने के मरे हुए बालक के शव पर इस विद्या की सिद्धि करनी चाहिए । सिद्धि की हुई यह विद्या मनुष्य को शीघ्र ही प्रसिद्धि प्रदान करती है ॥ ४४-४५ ॥

पीठशक्ति एवं पीठ मन्त्र - १. मेधा, २. प्रज्ञा, ३. प्रभा, ४. विद्या, ५. धी, ६. धृति, ७. स्मृति ८. बुद्धि एवं ६. विद्येश्वरी - ये पीठ की नव

योगपीठात्मने हार्दं पीठस्य मनुरीरितः ॥ ४८ ॥
दत्त्वानेनासनं मूर्तिं मूलमन्त्रेण कल्पयेत् ।
पूजयेद्विधिवद्देवीं तद्विधानमथोच्यते ॥ ४९ ॥

नित्यबलिदानमन्त्रः

तारो माया भगं ब्रह्माजटेसूर्यः सदीर्घखम् ।
यक्षाधिपतये तन्द्रीमोपनीतं बलिं ततः ॥ ५० ॥
गृह्णयुग्मं शिवा स्वाहा बलिमन्त्रोऽयमीरितः ।
दद्यान्नित्य बलिं तेन मध्यरात्रे चतुष्पथे ॥ ५१ ॥
जलदानादिकं मन्त्रैर्विदध्याद्दशभिस्ततः ।

नित्यबलिदानमन्त्रमाह – **तार** इति । तारः प्रणवः । माया ह्रीं । भगमेकारः । ब्रह्मा कः । जटे स्वरूपम् । सूर्यो मः । सदीर्घ खं हा । तन्द्री मः । शिवा ह्रीं । स्वरूपम् अन्यत् । यथा – ॐ ह्रीं एकजटे महायक्षाधिपतये ममोपनीतं बलिं गृह्ण गृह्ण ह्रीं स्वाहेति । अनेन नित्यं निशीथे बलिं दद्यात् ॥ ५० ॥ * ॥ ५१ ॥ जलग्रहणादिमन्त्रान् उद्धरति – **ध्रुव** इति । ॐ वज्रोदके हुं फडिति जलग्रहणमन्त्रः ॥ ५२ ॥ **तारेति** । ॐ ह्रीं स्वाहेति पादक्षालन मन्त्रः ।

शक्तियाँ हैं । भृगुमन्विन्दुसंयुक्त सकार (सं), तदनन्तर औ बिन्दु संयुक्त मेघवर्त्म हकार (हौं) सरस्वतीयोगपीठात्मने नमः - यह पीठ मन्त्र कहा गया है ॥ ४६-४८ ॥

विमर्श - पीठ मन्त्र का स्वरूप इस प्रकार है - 'सं हौं सरस्वती-योगपीठात्मने नमः' ॥ ४६-४८ ॥

इस पीठ मन्त्र से आसन देकर मूल मन्त्र से मूर्ति की कल्पना करनी चाहिए । तदनन्तर देवी की जिस प्रकार पूजा करनी चाहिए उसकी विधि कहते हैं ॥ ४९ ॥

पूजा के बाद नित्य बलिदान करना चाहिए । उसका मन्त्र इस प्रकार कहा है - तार (ॐ) माया (ह्रीं), भग (ए), ब्रह्मा (क), फिर 'जटे' पद । फिर सूर्य 'म', सदीर्घ ख 'हा' फिर यक्षाधिपतये' पद, इसके बाद तन्द्री (म), फिर 'मोपनीतं बलिं' यह पद, फिर गृह्ण गृह्ण, फिर शिवा (ह्रीं) एवं अन्त में स्वाहा पद - इतना बलि का मन्त्र कहा गया है । इस मन्त्र से अर्धरात्रि में चौराहे पर बलि प्रदान करना चाहिए ॥ ५०-५१ ॥

विमर्श - बलि मन्त्र का स्वरूप इस प्रकार है -

'ॐ ह्रीं एकजटे यक्षाधिपतये ममोपनीतं बलिं गृह्ण गृह्ण ह्रीं स्वाहा' - इस मन्त्र से नित्य अर्धरात्रि में बलिप्रदान करना चाहिए ॥ ५०-५१ ॥

इसके अनन्तर जल ग्रहणादि कार्य इन १० मन्त्रों से करना चाहिए ।

जलग्रहणादिमन्त्रोद्धारः

ध्रुवो वज्रोदके वर्मफट्सप्तार्णैर्जलग्रहः ॥ ५२ ॥
ताराद्यावह्निजायान्ता मायांघ्रिक्षालने स्मृता ।
तारो माया भृगुः कर्णीविशुद्धधर्मवर्णतः ॥ ५३ ॥
सर्वपापानिशाभ्याशे श्वेतो नेत्रयुतञ्जलम् ।
कल्पानपनयस्वाहा षड्विंशत्यक्षरो मनुः ॥ ५४ ॥
अनेनाचमनं कुर्याद् ध्रुवो मणिधरीति च ।
वज्रिण्यक्षियुतो मृत्युः खरिनेत्रयुता रतिः ॥ ५५ ॥
सर्वान्ते वबकः सेन्दुः करिण्यन्ते शिरोर्घिखम् ।
अस्त्रवह्निप्रियामन्त्रस्त्रयोविंशति वर्णवान् ॥ ५६ ॥
शिखाबन्धं प्रकुर्वीत मन्त्रेणानेन मन्त्रवित् ।

तार इति । कर्णी भृगुः उयुतः सः ॥ ५३ ॥ श्वेतः षः । नेत्रयुतं जलं वि । स्वरूपम् अन्यत् । ॐ ह्रीं सुविशुद्धधर्मसर्वपापनिशाम्याशेषविकल्पान् अपनय स्वाहेत्याचमनमन्त्रः ॥ ५४ ॥ ध्रुव इति । अक्षियुतो मृत्युः शि । नेत्रयुता रतिः णि ॥ ५५ ॥ वकः शं । शिरः कं । अर्घिसेन्दुः खं । बिन्दुयुतो हः हुं । अस्त्रं फट् । वह्निप्रिया स्वाहा । स्वरूपम् अन्यत् । यथा – ॐ मणिधरि वज्रिणि शिखरिणि सर्ववशङ्करिणि कं हुं फट् स्वाहेति शिखाबन्धनमन्त्रः ॥ ५६ ॥

---

१. ध्रुव (ॐ), फिर 'वज्रोदके' पद, फिर वर्म (हुं) अन्त में 'फट्' । इस सात अक्षर के मन्त्र से जल ग्रहण करना चाहिए ॥ ५२ ॥

२. माया बीज (ह्रीं) के आदि में तार (ॐ) तथा अन्त में वह्निजाया (स्वाहा) लगाने से पादप्रक्षालन का मन्त्र बनता है ।

३. तार (ॐ), कर्णीभृगु (सु) फिर 'विशुद्ध धर्म' फिर 'सर्वपापनिशाम्याशे' फिर श्वेत (ष), नेत्रयुत् जल (वि), फिर 'कल्पानपनय स्वाहा' इस छब्बीस अक्षर के मन्त्र से आचमन कराना चाहिए ॥ ५३-५४ ॥

४. ध्रुव (ॐ), फिर 'मणिधरि' यह पद, फिर अक्षियुत् मृत्यु (शि), फिर 'खरि' पद, फिर नेत्रयुता रति (णि), फिर 'सर्व' पद, फिर व, तदनन्तर सेन्दुवक (शं) तथा करिणि पद, फिर सेन्दु शिर (कं) अर्घिखं (हुं), अस्त्र (फट्) तथा अन्त में वह्निप्रिया (स्वाहा) इस तेईस अक्षरों के मन्त्र से साधक को शिखाबन्धन करना चाहिए ॥ ५५-५७ ॥

५. प्रणव (ॐ), तदनन्तर रक्ष युगल (रक्ष रक्ष), दीर्घ वर्म (हूं), अस्त्र (फट्) तदनन्तर ठ द्वय (स्वाहा), इस ८ अक्षर के मन्त्र से भूमिशोधन करना चाहिए ॥ ५७-५८ ॥

भूमिशोधनविघ्ननिवारणमन्त्रकथनम्

प्रणवो रक्षयुगलं दीर्घवर्मास्त्रठद्वयम् ॥ ५७ ॥
नववर्णेन मन्त्रेण कुर्याद्भूमिविशोधनम् ।
तारान्ते सर्वविघ्नानुत्सारयेतिपदं ततः ॥ ५८ ॥
हुंफट्स्वाहा गुणेन्द्वर्णो मनुर्विघ्ननिवारणे ।
अनेन विघ्नानुत्सार्य भूतशुद्धिमथाचरेत् ॥ ५९ ॥

भूतशुद्धिमन्त्रकथनम्

मायाबीजं जपापुष्पनिभं नाभौ विचिन्तयेत् ।
तदुत्थेनाग्निना देहं दहेत्सार्द्धं स्वपाप्मना ॥ ६० ॥
ताराबीजं सुवर्णाभं चिन्तयेद्धृदि मन्त्रवित् ।
पवनेन तदुत्थेन पापभस्म क्षिपेद् भुवि ॥ ६१ ॥
तुरीयं चन्द्रकुन्दाभं बीजं ध्यात्वा ललाटतः ।
तदुत्थसुधया देहं रचयेद्देवतानिभम् ॥ ६२ ॥

प्रणव इति । दीर्घं वर्म हूं । अस्त्रं फट् । ठद्वयं स्वाहा । ॐ रक्ष रक्ष हूं फट् स्वाहेति भूशोधनमन्त्रः । तारेति । ॐ सर्वविघ्नान् उत्सारय हुं फट् स्वाहेति विघ्नवारणमन्त्रः ॥ ५७ ॥ * ॥ ५८–५९ ॥ भूतशुद्धिमाह – **मायेति** ॥ ६० ॥ * ॥ ६१ ॥ **तुरीयमिति** – हूं ॥ ६२ ॥

---

६. तार (ॐ) के बाद 'सर्वविघ्नानुत्सारय' फिर 'हुं फट् स्वाहा' इस तेरह अक्षरों के मन्त्र से विघ्नों का निवारण कर पश्चात् भूतशुद्धि करनी चाहिए ॥ ५२-५९ ॥

विमर्श - **मन्त्रों का स्वरूप** इस प्रकार है -

१. जल ग्रहण मन्त्र - ॐ वज्रोदके हुं फट् ।

२. पादप्रक्षालन मन्त्र - ॐ ह्रीं स्वाहा ।

३. आचमन मन्त्र - ॐ ह्रीं सुविशुद्धधर्मसर्वपापनिशाम्याशेषविकल्पानपनय स्वाहा ।

४. शिखाबन्धन मन्त्र - ॐ मणिधरि वज्रिणि शिखरिणि सर्ववशङ्करिणि कं हुं फट् स्वाहा ।

५. भूमिशोधन मन्त्र - ॐ रक्ष रक्ष हूं फट् स्वाहा ।

६. विघ्न निवारण मन्त्र - ॐ सर्वविघ्नानुत्सारय हुं फट् स्वाहा ॥ ५२-५९ ॥

अब **भूतशुद्धि का प्रकार** कहते हैं - सर्वप्रथम जपा कुसुम (ओड़हुल) के समान लाल आभा वाले माया बीज (ह्रीं) का नाभिस्थान में ध्यान करना चाहिए । तदनन्तर उससे निकलने वाली अग्नि की लपटों से पाप सहित अपने

अनयाभूतशुद्ध्या तु देवीसादृश्यमाप्नुयात् ।

भूमिनिमन्त्रणमन्त्रः

तारः पवित्रवज्रेति भूमेर्घीशेन्दुयुग्वियत् ॥ ६३ ॥

तार इति । अर्घीशेन्दुयुक् वियत् । ऊबिन्दुयुतो हः हूं । ॐ पवित्रवज्रभूमे हूं स्वाहेति भूमिनिमन्त्रणमन्त्रः ॥ ६३ ॥

शरीर को जला देना चाहिए । फिर सुवर्ण के समान पीत वर्ण वाले त्रीं या स्त्रीं का हृदय प्रदेश में ध्यान कर उससे उत्पन्न वायु द्वारा पापों को भस्म कर शरीर से बाहर निकाल कर पृथ्वी पर फेंक देना चाहिए । पश्चात् चन्द्रमा या कुन्द के समान श्वेत आभा वाले तुरीय बीज (हूँ) का ललाट देश में ध्यान कर उससे उत्पन्न अमृत द्वारा देवता के समान अपने निष्पाप शरीर की रचना करनी चाहिए । इस प्रकार की भूतशुद्धि की क्रिया से साधक स्वयं देवी के सदृश बन जाता है ॥ ६०-६३ ॥

विमर्श - भूतशुद्धि प्रयोगविधि - साधक को अपनी गोद में दोनों हाथों को उत्तानमुद्रा में रखकर पद्मासन बाँधकर एकान्त एवं शान्त भाव से बैठ जाना चाहिए । फिर 'हंस' मन्त्र से साधक कुण्डलिनी को जीवात्मा एवं चौबीस तत्वों के साथ सुषुम्नामार्ग से ऊर्ध्व गति से ले जाकर शिर में स्थित सहस्रार पद्म में परमशिव से उन्हें मिला दें ।

(i) तदनन्तर साधक नाभि में रक्तवर्ण **'ह्रीं' बीज** का ध्यान कर सोलह बार जप करते हुए पूरक क्रिया द्वारा उस बीज से उत्पन्न अग्नि की लपटों से पापसहित लिङ्ग शरीर को जला दे ।

(ii) तत्पश्चात् हृदय में पीतवर्ण **'स्त्रीं' बीज** का ध्यान कर चौंसठ बार जप करते हुए कुम्भक प्राणायाम से भस्म को इकट्ठा कर साधक को रेचक क्रिया द्वारा उक्त भस्म को बाहर निकाल कर फेंक देना चाहिए ।

(iii) इसके बाद शिर में शुक्लवर्ण **'हुं' बीज** का ध्यान कर बत्तीस बार जप करते हुए पूरक क्रिया द्वारा उससे उत्पन्न अमृत से आप्लावित कर दिव्य शरीर की रचना करनी चाहिए ।

फेत्कारिणी तन्त्र के अनुसार साधक को भूतशुद्धि कर 'आः' वर्ण को रक्त कमल के समान ध्यान कर उसके 'आँ' वर्ण को श्वेतकमल के समान और उसके ऊपर 'हुं' बीज को नीलकमल के समान ध्यान कर उसके ऊपर 'हूं' बीज से उत्पन्न बीजभूषित कर्तरिका का ध्यान करना चाहिए । कर्तरिका के ऊपर अपनी आत्मा का तारिणी (तारादेवी) के रूप में ध्यान करना चाहिए । फिर 'आं' ह्रीं क्रौं स्वाहा' इस मन्त्र का ग्यारह बार जप करते हुए हृदय में देवी की

वह्निप्रियामनुः प्रोक्ता रुद्रार्णो भूमिमन्त्रणे ।

मण्डलमन्त्रः

तारोऽनन्तो भृगुः कर्णी पद्मनाभयुतो बली ॥ ६४ ॥
खे वज्ररेखे क्रोधाख्यं बीजं पावकवल्लभा ।
द्वादशार्णेन मन्त्रेण रचयेन्मण्डलं शुभम् ॥ ६५ ॥

पुष्पशोधनमन्त्रः

तारो यथागतानिद्रासदृक्षेकभृगुर्विषम् ।
सदीर्घस्मृतिरौ साक्षौ महाकालो भगान्वितः ॥ ६६ ॥
क्रोधोस्त्रं मनुवर्णोऽयं मनुः पुष्पादिशोधने ।

चित्तशोधनमन्त्रः

तारः पाशपरास्वाहा पञ्चार्णश्चित्तशोधने ॥ ६७ ॥

तार इति । अनन्त आ । कर्णी भृगुः । सु । पद्मनाभयुतो बली एयुतो रः रे । क्रोधबीजं हुं । ॐ आसुरेखे वज्ररेखे हुं स्वाहेति मण्डलमन्त्रः ॥ ६४ ॥ * ॥ ६५ ॥ **तार** इति । सदृक् निद्रा इयुतो भः भिः । भृगुः सः । विषं मः । सदीर्घमायुतम् । स्मृतिरो गकाररेफौ साक्षौ इयुतौ ग्नि । भगान्वितो महाकालः एयुतो मः ॥ ६६ ॥ क्रोधो हुं । अस्त्रं फट् । यथा – ॐ गताभिषेकसमाग्नि मे हुं फडिति पुष्पशोधनमन्त्रः । **तार** इति । पाश आं । परा ह्रीं । ॐ आं ह्रीं स्वाहेति चित्तशोधनमन्त्रः ॥ ६७ ॥

प्राणप्रतिष्ठा करनी चाहिए । इस प्रकार की भूतिशुद्धि की क्रिया से साधक स्वयं देवी सदृश हो जाता है ॥ ६०-६३ ॥

अब **भूमिनिमन्त्रण आदि का मन्त्र** कहते हैं -

७. तार (ॐ), फिर 'पवित्र वज्र' पद, फिर भूमि, फिर अर्धीशेन्दुयुत वियत् (हूँ), इसके अन्त में वह्निप्रिया (स्वाहा) यह ग्यारह अक्षरों का भूमि अभिमन्त्रण का मन्त्र बन जाता है ॥ ६३-६४ ॥

८. तार (ॐ), अनन्त (आ), फिर कर्णी भृगु (सु) फिर पद्मनाभयुत बली (रे), तदनन्तर 'खे वज्र रेखे', फिर क्रोध बीज (हुं), फिर अन्त में पावकवल्लभा (स्वाहा) लगाने से बारह अक्षरों का मण्डल रचना का मन्त्र निष्पन्न होता है । साधक को इस मन्त्र से शुभ मण्डल की रचना करनी चाहिए ॥ ६४-६५ ॥

९. तार (ॐ), फिर 'यथागता', फिर 'सदृक् निद्रा' इकार युक्त भकार अर्थात् (भि), फिर 'षेक' पद, फिर भृगु (स), सदीर्घविष (मा), साक्षि स्मृति

मनवो दश संप्रोक्ता अर्घ्यस्थापनमुच्यते ।

अर्घ्यस्थापनम्

सेन्दुभ्यां मांसतोयाभ्यां भुवं संमृज्य भूगृहम् ॥ ६८ ॥
वृत्तं त्रिकोणसंयुक्तं कुर्यान्मण्डलमन्त्रतः ।
यजेत्तत्राधारशक्तिं कच्छपं नागनायकम् ॥ ६९ ॥
आधारं स्थापयेत्तत्र ताराद्यस्त्राङ्गमायया ।
वह्निमण्डलमभ्यर्च्य महाशङ्खं निधापयेत् ॥ ७० ॥

अर्घ्यस्थापनमाह – **सेन्दुभ्यामिति** । मांसं लः । तोयं वः ॥ ६८ ॥ सबिन्दुभ्याम् आभ्यां भूमिं संशोध्य पूर्वोक्तेन मण्डलमन्त्रेण वृत्तत्रिकोण–चतुष्कोणात्मकं मण्डलं कुर्यात् । तत्राधारशक्तिं कूर्मशेषान् संपूज्य ॥ ६९ ॥ ॐ ह्रीं फडिति मन्त्रेणार्घ्याधारं स्थापयेत् । मं वह्निमण्डलाय नम इति तत्सम्पूज्य ॥ ७० ॥ वामकर्णेन्दुयुक्तेन उबिन्दुयुतेन फडन्तेन विहायसा हकारेण

(ग्नि), भगान्वित महाकाल (मे), क्रोध (हुं), एवं अन्त में अस्त्र (फट्) लगाने से चौदह अक्षरों का पुष्पादिशोधन मन्त्र बनता है ।

१०. तार (ॐ), पाशं (आं) परा (ह्रीं) उसके अन्त में स्वाहा लगाने से पाँच अक्षरों का चित्तशोधन मन्त्र बनता है -

इस प्रकार जल ग्रहण आदि के दश मन्त्र बतलाये गये । आगे अर्घ्य स्थापन की क्रिया का वर्णन करेगें ॥ ६६–६७ ॥

विमर्श - मन्त्रों का स्वरूप इस प्रकार है -

७ - भूमि अभिमन्त्रण मन्त्र - ॐ पवित्रवज्रभूमे हूं स्वाहा ।

८ - मण्डल रचना मन्त्र - ॐ आसुरेखे वज्ररेखे हुं स्वाहा

९ - पुष्पादिशोधन मन्त्र - ॐ यथागताभिषेकसमाग्नि मे हुं फट् ।

१० - चित्तशोधन मन्त्र - ॐ आं ह्रीं स्वाहा ॥ ६६-६७ ॥

यहाँ तक ग्रन्थकार ने दश मन्त्रों का वर्णन किया । अब आगे **अर्घ्य स्थापन की विधि** कहते हैं -

सेन्दु (सानुस्वार) मांस (ल) तथा तोय व (अर्थात् लं वं) मन्त्र पढ़कर भूमि शोधन करें । पश्चात् मण्डल मन्त्र (ॐ आसुरेखे वज्ररेखे हुं स्वाहा) पढ़कर वृत्त त्रिकोण और चतुष्कोणात्मक मण्डल की रचना कर उस पर आधार शक्ति 'आधारशक्तये नमः' कच्छप (कच्छपाय नमः) नागनायक शेष (शेषाय नमः) का पूजन करें । तदनन्तर आदि में तार (ॐ) माया (ह्रीं) सहित फडन्त मन्त्र अर्थात् 'ॐ ह्रीं फट्' इस मन्त्र से मण्डल पर आधार पात्र स्थापित करें । इसके पश्चात् 'मं वह्निमण्डलाय नमः' इस मन्त्र से वह्निमण्डल

मन्त्रचतुष्टयेन महाशंखपूजा

वामकर्णेन्दुयुक्तेन फडन्तेन विहायसा ।
प्रक्षालितं भृगुर्दण्डित्रिमूर्तीन्दुयुतं पठन् ॥ ७१ ॥
ततोऽर्चयेन्महाशङ्खं जपन्मन्त्रचतुष्टयम् ।

मन्त्रचतुष्टयकथनम्

दीर्घत्रयान्विता माया कालीसृष्टिः सदीर्घपः ॥ ७२ ॥
प्रतिष्ठा संयुतं मांसं पवनो हृदयं ततः ।
एकादशार्णः प्रथमो महाशङ्खार्चने मनुः ॥ ७३ ॥
हंसो हरिभुजङ्गेशयुतो दीर्घत्रयेन्दुयुक् ।
तारिण्यन्ते कपालायनमोऽन्तो द्वादशाक्षरः ॥ ७४ ॥

हुं फडिति मन्त्रेण प्रक्षालितं महाशङ्खं नरकपालम् । दण्डि त्रिमूर्तीन्दुयुतं त्रईबिन्दुयुक्तं भृगु सकारम् स्त्रीमिति बीज पठन् । स्थापयेदित्यन्वयः ॥ ७१ ॥ ततो मन्त्रचतुष्टयेन महाशङ्खपूजा । मन्त्रचतुष्टयमाह – **दीर्घेति** । दीर्घत्रयम् – आ ई ऊ । तद्युता माया सृष्टिः कः । सदीर्घ पः पा । प्रतिष्ठा आकारस्तद्युतं मांसं लः ला । पवनो यः हृदयं नमः । ह्रां ह्रीं ह्रूँ 'कालीकपालाय नमः' इत्येको मन्त्रः ॥ ७२ ॥ * ॥ ७३ ॥ **हंस** इति । हंसः सः । हरिभुजङ्गे शौ तरौ ताभ्यां युतः तथा दीर्घत्रयं बिन्दुयुतश्च । स्वरूपमन्यत् । स्त्रां स्त्रीं स्त्रूं तारिणीकपालाय नम इति द्वितीयः ॥ ७४ ॥

की पूजाकर वाम कर्ण (उकार) इन्दु अनुस्वार से युक्त विहायस ह (अर्थात् हुं) उसके बाद फट् अर्थात् 'हुं फट्' इस मन्त्र से महाशंख (नरकपाल) का प्रक्षालन कर भृगु (स), दण्डी तृ त्रिमूर्त्ती ई उस पर बिन्दु (अर्थात् स्त्रीं) इस बीज मन्त्र से महाशंख (नर कपाल) को आधार पात्र पर स्थापित करना चाहिए ॥ ६८-७१ ॥

तदनन्तर वक्ष्यमाण चार मन्त्रों को पढ़ते हुए उस महाशङ्ख की पूजा करनी चाहिए । दीर्घत्रयान्विता माया (ह्रां ह्रीं ह्रुं), फिर 'काली', सृष्टि (क), दीर्घ सहित प (पा), प्रतिष्ठा युत् मांस (ला), तदनन्तर पवन (य), अन्त में हृदय (नमः) लगाने से महाशङ्ख पूजा का ग्यारह अक्षर का प्रथम मन्त्र बनता है ॥ ७२-७३ ॥

विमर्श - मन्त्र का स्वरूप - (i) 'ह्रां ह्रीं ह्रूं कालीकपालाय नमः' ।

अनुस्वार एवं दीर्घ त्रय सहित हंस (स्), हरि (त्), भुजङ्गेश (र्) अर्थात् स्त्रां स्त्रीं स्त्रृं फिर 'तारिणी' उसके अन्त में 'कपालाय नमः' लगाने से बारह अक्षर का दूसरा मन्त्र बनता है ॥ ७४ ॥

विमर्श - (ii) 'स्त्रां स्त्रीं स्त्रृं तारिणीकपालय नमः' ।

खं दीर्घत्रयबिन्द्वाढ्यं मेषोवामदृगन्वितः।
लोकपालाय हृदयं तृतीयोऽयं शिवाक्षरः॥ ७५॥
माया स्त्रीबीजमर्घ्नीन्दुयुतं खं स्वर्गखादिमः।
पालाय सर्वाधाराय सर्वः सर्वोद्भवस्तथा॥ ७६॥
सर्वशुद्धिमयश्चेति ङेन्ताः सर्वासुरान्ततः।
रुधिरारुरतिर्दीर्घावायुः शुभ्रानिलः सुरा॥ ७७॥
भाजनाय भगीसत्यो वीकपालायहृन्मनुः।
तुर्यो रसेषु वर्णोऽयं महाशङ्खप्रपूजने॥ ७८॥

खमिति । खं हः । दीर्घत्रयबिन्दुयुतः । वामदृगन्वितो मेषः ईयुतो नः नी । स्वरूपमग्रे । हां हीं हूँ नीलाकपालाय नम इति तृतीयः॥ ७५॥ चतुर्थमाह – **मायेति** । माया ह्रीं । स्त्रीबीजं स्त्रीं । अर्घ्नीन्दुयुतं खं हूं । स्वर्ग स्वरूपम् । खादिमः कः । पालायेत्यादिस्वरूपम् । सर्वः सर्वोद्भवः सर्वशुद्धिमय इतिपदत्रय चतुर्थ्यन्तम् । स्वरूपमग्रे । दीर्घा रतिः णा । वायुः यः । शुभ्रा स्वरूपम् । अनिलो यकारः । सुराभाजनाय स्वरूपम् । भगी सत्यः एयुतो दः दे । वीत्यादिस्वरूपम् । हृन्नमः । यथा – ह्रीं स्त्रीं हूं स्वर्गकपालाय सर्वाधाराय सर्वाय सर्वोद्भवाय सर्वशुद्धिमयाय सर्वासुररुधिरारुणाय शुभ्राय सुराभाजनाय देवीकपालाय नम इति चतुर्थो मन्त्रः रसेषु वर्णः षट्–पञ्चाशदक्षरः । एभिर्मन्त्रैर्महाशङ्खं सम्पूज्य अं सूर्यमण्डलाय नम इत्यर्कमण्डलं

बिन्दु एवं दीर्घत्रय समन्वित ख (ह) अर्थात् हां हीं हूँ, वामदृक् सहित मेष (नी), फिर 'ला कपालाय' उसके अन्त में हृदय (नमः) लगाने से ग्यारह अक्षरों का तृतीय मन्त्र बनता है॥ ७५॥

विमर्श – मन्त्र का स्वरूप – (iii) 'हां हीं हूं नीलाकपालाय नमः' ।

माया (ह्रीं), स्त्रीं बीज (स्त्रीं), अर्घ्नीन्दुयुत् ख (हूँ), फिर 'स्वर्ग', तदनन्तर खादिम (क), फिर 'पालाय सर्वाधाराय', फिर चतुर्थ्यन्त सर्व, 'सर्वोद्भव' तथा 'सर्वशुद्धिमय' शब्द (सर्वोद्भवाय सर्वशुद्धिमयाय), फिर 'सर्वासुर' तब 'रुधिरारु' उसके अनन्तर दीर्घरति 'णा', फिर वायु य (सर्वासुर रुधिरारुणाय), फिर 'शुभ्रा' पद फिर अनिल (य) (शुभ्राय), तदनन्तर 'सुराभाजनाय', फिर भगीसत्य (दे), फिर 'वीकपालाय' पद (देवीकपालाय), तदनन्तर हृत् (नमः) इस प्रकार रस ६ इषु ५ 'अङ्कानां वामतो गतिः' के अनुस्वार ५६ अक्षरों का तुर्य अर्थात् चौथा महाशंखपूजन का मन्त्र निष्पन्न होता है॥ ७६-७८॥

विमर्श – मन्त्र का स्वरूप – (iv) 'ह्रीं स्त्रीं हूं स्वर्गकपालाय सर्वाधाराय सर्वाय सर्वोद्भवाय सर्वशुद्धिमयाय सर्वासुररुधिरारुणाय शुभ्राय सुराभाजनाय देवीकपालाय नमः॥ ६७-७८॥

तत्रार्कमण्डलं चेष्ट्वा सलिलं मूलमन्त्रतः ।
प्रपूरयेत्सुधाबुद्ध्या गन्धपुष्पाक्षतान् क्षिपेत् ॥ ७९ ॥

चन्द्रमण्डलपूजा

मुद्रां त्रिखण्डां संदर्श्य पूजयेच्चन्द्रमण्डलम् ।

एकादशार्णमन्त्रोद्धारः

वाक्शक्तिपद्मागगनं रेफानुग्रहबिन्दुयुक् ॥ ८० ॥
मूलमन्त्रो वियद्धंसमनुसर्गसमन्वितम् ।
वराहो दीपिकेन्द्वाढ्यो मनुरेकादशाक्षरः ॥ ८१ ॥

संपूज्य, मूल मन्त्रं पठन् सुधाबुद्ध्या तोयं सम्पूर्य, तत्र गन्धपुष्पाक्षतान् क्षिपेत् । सुधा सुरात्रेति रहस्यम् ॥ ७६–७९ ॥ त्रिखण्डां मुद्रां बद्ध्वा । ॐ सोममण्डलाय नम इति तोये चन्द्रमण्डलं सम्पूज्यैकादशार्णेन मन्त्रेणाष्टवारं जलं मन्त्रयेत् ।

त्रिखण्डालक्षणं यथा –

परिवर्त्यकरौ स्पष्टावङ्गुष्ठौ कारयेत् समौ ॥
अनामान्तर्गते कृत्वा तर्जन्यौ कुटिलाकृती ।
कनिष्ठिके नियुञ्जीत निजस्थाने महेश्वरि ॥
त्रिखण्डेयं समाख्याता त्रिपुराह्वानकर्मणि ॥ इति ॥

एकादशार्णमाह – **वागिति** । वाक् ऐं । शक्ति ह्रीं । पद्मा श्रीं । रेफानुग्रहबिन्दुयुक् गगनं रेफ औबिन्दुयुतो हः ह्रौं । मूलमन्त्रः पूर्वोक्तः पञ्चार्णः । हंसमनुसर्गसमन्वितं वियत् । सऔ विसर्गयुतो हः ह्सौः । दीपिकेन्द्वाढ्यो वराहः ऊ । बिन्दुयुतो हः हूं । यथा – ऐं ह्रीं श्रीं ह्रौं ॐ ह्रीं त्रीं हूं फट् ह्सौ हूमिति ॥ ८०–८१ ॥

उस कपाल में 'अं सूर्यमण्डलाय नमः' मन्त्र से अर्कमण्डल की पूजाकर मूलमन्त्र पढ़ते हुए मद्य की भावना से उसमें जल भरे, तदनन्तर गन्ध, पुष्प एवं अक्षत डालकर त्रिखण्डामुद्रा दिखाते हुए 'ॐ सोममण्डलाय नमः' इस मन्त्र से जल में चन्द्रमण्डंल की पूजा करनी चाहिए ॥ ७९-८० ॥

वाक् (ऐं), शक्ति (ह्रीं), पद्मा (श्रीं), रेफानुग्रह बिन्दुसहित गगन (ह्रीं), फिर मूल मन्त्र (ॐ ह्रीं त्रीं हुं फट्), फिर स औ विसर्ग से युक्त ह अर्थात् ह्सौः, फिर अन्त में दीपिका एवं बिन्दुसहित वराह (हूँ) लगाने से ग्यारह अक्षरों वाला मन्त्र बनता है ॥ ८१ ॥

विमर्श - यथा - ऐं ह्रीं श्रीं ह्रीं ॐ ह्रीं त्रीं हुं फट् ह्सौः हूं ॥ ८१ ॥

अष्टकृत्वोऽमुनामन्त्री मन्त्रयेत् प्रयतो जलम् ।
मायया मदिरां क्षिप्त्वा शंखं योनिं च दर्शयेत् ॥ ८२ ॥

ततो ह्रीं बीजेन तोये सुरां प्रक्षिप्य शङ्खयोनिमुद्रे दर्शयत् ।
ततो लक्षणं यथा –

वामाङ्गुष्ठं तु संगृह्य दक्षहस्तस्य मुष्टिना ।
कृत्वोत्तानं तथा मुष्टिमङ्गुष्ठे तु प्रसारयेत् ।
वामाङ्गुल्यस्तथाश्लिष्टाः संयुताः सुप्रसारिताः ।
दक्षिणाङ्गुष्ठके लग्ना मुद्राशङ्खस्य भूतिदा । इति शङ्खमुद्रालक्षणम् ।
मिथः कनिष्ठिके बद्धा तर्जनीभ्यामनामिके ।
अनामिकोर्ध्व संश्लिष्ट दीर्घमध्यमयोरधः ।
अङ्गुष्ठाग्रद्वयं न्यस्येद्योनि मुद्रेयमीरिता । इति योनिमुद्रालक्षणम् ॥ ८२ ॥

इस मन्त्र को आठ बार पढ़कर साधक जल को अभिमन्त्रित करे । फिर मायावीज (ह्रीं) मन्त्र से उसमें मदिरा डालकर शंखमुद्रा एवं योनिमुद्रा प्रदर्शित करें ॥ ८२ ॥

विमर्श - अर्घ्यस्थापन की विधि - साधक अपने बॉयीं ओर अर्घ्यस्थापन के लिए सर्वप्रथम 'लं वं', इन बीजों से भूमि साफ एवं शुद्ध करके 'ॐ आसुरेखे वज्ररेखे हुं स्वाहा' इस मन्त्र से वृत्त त्रिकोण एवं चतुष्कोण मण्डल बनावें । उस पर 'ॐ आधारशक्तये नमः, ॐ कूर्माय नमः, ॐ शेषाय नमः', इन मन्त्रों से आधारशक्ति, कूर्म एवं शेषनाग का पूजन कर 'ॐ ह्रीं फट्' मन्त्र से अर्घ्य के आधार पात्र को स्थापित करे ।

तत्पश्चात् 'ॐ मं वह्निमण्डलाय नमः, - इस मन्त्र से आधार पात्र का पूजन कर 'हुँ फट्' मन्त्र से महाशंख (नरकपाल) को धोकर 'स्त्रीं' बीज पढ़ते हुये आधार पात्र पर महाशंख को स्थापित करना चाहिए ।

फिर निम्नलिखित चार मन्त्रों से महाशंख का पूजन करना चाहिए ।

१ - ह्रां ह्रीं ह्रूं कालीकपालाय नमः ।

२ - स्त्रां स्त्रीं स्त्रूं तारिणीकपालाय नमः ।

३ - हां हीं हूं नीलाकपालाय नमः ।

४ - ह्रीं स्त्रीं ह्रूं स्वर्गकपालाय सर्वाधाराय सर्वाय सर्वोद्भवाय सर्वशुद्धिमयाय सर्वासुररुधिरारुणाय शुभ्राय सुराभाजनाय देवी कपालाय नमः ।

इन मन्त्रों से महाशंख का पूजन कर 'अं सूर्यमण्डलाय नमः' - इस मन्त्र से अर्कमण्डल का पूजन कर मूलमन्त्र पढते हुए मदिरा की भावना से उसमें जल भरकर उसमें गन्ध, पुष्प एवं अक्षत डालने चाहिए तथा त्रिखंडा मुद्रा प्रदर्शित करनी चाहिए ।

तत्र वृत्ताष्टषट्कोणं ध्यात्वा देवीं विचिन्तयेत्।
पूर्वोक्तां पूजयित्वैनां मूलेनाथ प्रतर्पयेत्॥ ८३॥
तर्जनी मध्यमानामाकनिष्ठाभिर्महेश्वरी।
साङ्गुष्ठाभिश्चतुर्वारं महाशङ्खस्थिते जले॥ ८४॥

तर्पणमन्त्रः


खं रेफमनुबिन्द्वाढ्यं भृगुमन्विन्दुयुक् तथा।
ध्रुवाद्येन नमोऽन्तेन तर्प्यादानन्दभैरवम्॥ ८५॥

तत्रार्घ्यजले वृत्ताष्टषट्कोणरूपं यन्त्रं विचिन्त्य ध्यानोक्तां देवीं च स्मृत्वा मूलेनार्चयेत् ॥ ८३ ॥ ततो अङ्गुष्ठयुताभिस्तर्जन्याद्यङ्गुलीभिरर्घ्यजले मूलेन तां तर्पयेत्॥ ८४॥ **खमिति** । ख हः । मनुरौ । भृगुः सः । तथा हकार एव भृग्वादियुतः । ध्रुव ॐ । यथा – ॐ हौं ह्सौं नम इत्यानन्दभैरवं तर्पयेत्॥ ८५–८६॥

फिर 'ॐ सोममण्डलाय नमः' - इस मन्त्र से जल में चन्द्रमण्डल की पूजा कर 'ऐं ह्रीं श्रीं ॐ ह्रीं त्रीं हुं फट् ह्सौः हूम्' इस मन्त्र को पढ़ते हुए आठ बार जल को अभिमन्त्रित करना चाहिए ॥ ८२ ॥

तत्पश्चात् 'ह्रीं' से उस जल में तीर्थ (मदिरा) डालकर शंख मुद्रा एवं योनि मुद्रा प्रदर्शित करनी चाहिए ।

तारापूजनयन्त्रम्



उस अर्घ्य के जल में वृत्त, अष्टदल एवं षटकोण रूपी यन्त्र की भावना कर पूर्वोक्त (४.३६,४०) विधि से देवी का ध्यान कर मूल मन्त्र से उनका पूजन करना चाहिए ॥ ८३ ॥

तदनन्तर तर्जनी, मध्यमा, अनामिका, कनिष्ठिका तथा अंगूठे को मिलाकर मूलमन्त्र द्वारा महाकपाल स्थित अर्घ्य के जल से ४ बार देवी का तर्पण करना चाहिए ॥ ८४ ॥

फिर ख (ह), जो रेफ औ और बिन्दु से युक्त हो (हौं) तथा बिन्दु अनुस्वार भृगु स और औ से युक्त हकार (ह्सौं) इस प्रकार मन्त्र के आदि में ध्रुव (ॐ) लगाकर अन्त में 'नमः' लगाकर अर्थात् 'ॐ हौं ह्सौं नमः' इस मन्त्र से आनन्दभैरव का तर्पण करना चाहिए ॥ ८५ ॥

ततस्तेनार्घ्यतोयेन प्रोक्षेत्पूजनसाधनम् ।
योनिमुद्रां प्रदर्श्याथ प्रणमेद्भवतारिणीम् ॥ ८६ ॥
विधानमध्ये सम्प्रोक्तं सर्वसिद्धिप्रदायकम् ।
पूर्वोक्ते पूजयेत्पीठे पद्मे षट्कोणकर्णिके ॥ ८७ ॥
धरागृहावृते रम्ये देवीं रम्योपचारकैः ।
महीगृहचतुर्दिक्षु गणेशादीन्प्रपूजयेत् ॥ ८८ ॥

पीठे शक्तिपूजायां गणेशध्यानादिकथनम्

पाशांकुशौ कपालं च त्रिशूलं दधतं करैः ।
अलङ्कारचयोपेतं गणेशं प्राक्समर्चयेत् ॥ ८९ ॥
कपालशूले हस्ताभ्यां दधतं सर्पभूषणम् ।
श्वयूथवेष्टितं रम्यं बटुकं दक्षिणेर्चयेत् ॥ ९० ॥
असिशूलकपालानि डमरुं दधतं करैः ।
कृष्णं दिगम्बरं क्रूरं क्षेत्रपं पश्चिमे यजेत् ॥ ९१ ॥

इत्यर्घ्यविधिं कृत्वा पूर्वोक्ते मेधादि नवशक्तिके पीठे तां पूजयेत् ॥ ८७-८८ ॥ गणेशादिध्यानमाह – **पाशेति** । अङ्कुशत्रिशूले दक्षयोः । पाशकपाले वामयोः । अलङ्काराणां चयः समूहस्तद् युतम् ॥ ८९ ॥ बटुकस्य दक्षे शूलम् ॥ ९० ॥ क्षेत्रपालस्यासिशूले दक्षयोः ॥ ९१ ॥

तर्पण करने के उपरान्त अर्घ्यपात्रस्थ जल से पूजा सामग्री का प्रोक्षण करें । फिर योनिमुद्रा दिखाकर भवतारिणी भगवती तारा को प्रणाम करना चाहिए॥ ८६॥

तारा पूजा के विधान के मध्य में ग्रन्थकार ने पूर्व में सर्वसिद्धि प्रदान करने वाले पीठ का वर्णन किया है । उसी पूर्वोक्त (द्र० ४.८३) षट्कोण, कर्णिका, अष्टदल कमल एवं भूपुर से वेष्टित पीठ पर रम्य उपचारों से देवी का पूजन करना चाहिए । तदनन्तर वक्ष्यमाण विधि से पीठ के चारों ओर गणेशादि का पूजन करना चाहिए ॥ ८७-८८ ॥

अब भगवती के **आवरण की पूजा** का प्रकार कहते हैं

पीठ के पूर्व दिशा के द्वार पर हाथों में पाश, अंकुश कपाल तथा त्रिशूल धारण किये हुए अनेक अलङ्कारों से सुशोभित गणेश जी का पूजन करना चाहिए ॥ ८९ ॥

पीठ के दक्षिण द्वार पर हाथों में कपाल एवं त्रिशूल लिए हुये सर्परूप आभूषणों से सुशोभित श्वानों के दल से घिरे हुये बटुक भैरव की पूजा करनी चाहिए ॥ ९० ॥

पीठ के पश्चिम द्वार पर तलवार, त्रिशूल, कपाल एवं डमरु हाथों में लिए हुये, कृष्णवर्ण, दिगम्बर एवं क्रूर आकृति वाले क्षेत्रपाल का पूजन

कपालं डमरुं पाशं लिङ्गं सम्बिभ्रतीं करैः ।
अन्त्राकल्पा रक्तवस्त्रा योगिनीरुत्तरे यजेत् ॥ ६२ ॥
अक्षोभ्यं प्रयजन्मूर्ध्नि देव्यामन्त्रऋषिं शुभम् ।
अक्षोभ्यवज्रपुष्पं च प्रतीच्छानलवल्लभा ॥ ६३ ॥
अक्षोभ्यपूजने मन्त्रः षटकोणेषु षडङ्गकम् ।
वैरोचनं चामिताभं पद्मनाभाभिधं तथा ॥ ६४ ॥
शङ्खं पाण्डुरसंज्ञं च दिग्दलेषु प्रपूजयेत् ।
लामकां मामकां चैवपाण्डुरां तारकां तथा ॥ ६५ ॥
विदिग्गताब्जपत्रेषु पूजयेदिष्टसिद्धये ।
सबिन्दुनामाद्यर्णाद्याः सम्बुध्यन्तास्तथाभिधाः ॥ ६६ ॥
वज्रपुष्पं प्रतीच्छाग्निप्रियान्ताः प्रणवादिकाः ।
वैरोचनादिपूजायां मनवः परिकीर्तिताः ॥ ६७ ॥

योगिनीनां पाशलिङ्गे दक्षयोः ॥ ६२ ॥ अक्षोभ्य वज्रपुष्पं प्रतीच्छ स्वाहेति मुनिमन्त्रः ॥ ६३–६५ ॥ सबिन्दुनामादिवर्ण आद्यो यासां ईदृश्य संबोधनान्ताः प्रणवाद्या वज्राद्यन्ता अभिधानामान्येव वैरोचनादिमन्त्राः । यथा – ॐ वैं वैरोचनवज्रपुष्पं प्रतीच्छ स्वाहा । ॐ अं अमिताभवज्रपुष्पं प्रतीच्छ स्वाहा । ॐ पं पद्मनाभवज्रपुष्पं प्रतीच्छ स्वाहा । ॐ शं शङ्खपाण्डुरवज्रपुष्पं प्रतीच्छ स्वाहा । ॐ लां लामके वज्रपुष्पं प्रतीच्छ स्वाहा । ॐ मां मामके वज्रपुष्पं प्रतीच्छ स्वाहा इत्यादि । पद्मान्तकादि पूजायाम् अप्येवमेव मन्त्राः ॥ ६६ ॥ * ॥ ६७–६६ ॥

करना चाहिए ॥ ६१ ॥

तदनन्तर पीठ के उत्तर द्वार पर कपाल, डमरु, पाश एवं लिङ्ग हाथों में धारण करने वाली और लाल वस्त्र धारण की हुई तथा आंतों के आभूषणों से भूषित योगिनियों की पूजा करनी चाहिए ॥ ६२ ॥

पीठ के ऊपर देवी के मस्तक पर नागरूप से विराजमान तारा मन्त्र के अक्षोभ्य ऋषि का 'अक्षोभ्य वज्रपुष्पं प्रतीच्छ स्वाहा' इस मन्त्र से पूजन करना चाहिए । तदनन्तर षट्कोणों में षडङ्गपूजा करनी चाहिए ॥ ६३ ॥

पूर्वादि दिशाओं के अष्टदलों में क्रमशः वैरोचन, अमिताभ, पद्मनाभ एवं पाण्डुशंख की पूजा करें । अष्टदल के कोणों में इष्टसिद्धि के लिए लामका, मामका, पाण्डुरा तथा तारका की पूजा करनी चाहिए । संबोधन पूर्वक नाम के आद्य अक्षर में अनुस्वार लगाकर, तदनन्तर 'वज्रपुष्पं प्रतीच्छ स्वाहा' इस मन्त्र से वैरोचन आदि की पूजा करनी चाहिए । भूपुर के चारों द्वारों पर पद्मान्तक, यमान्तक, विघ्नान्तक, तथा नारान्तक की पूजा

भूगृहस्य चतुर्द्वार्षु पद्मान्तकयमान्तकौ।
विघ्नान्तकाभिधं पश्चान्नारान्तकमथो यजेत्॥ ६८॥
शक्रादींश्चापि वज्रादीन् पूजयेत्तदनन्तरम्।
एवं सम्पूजयेद्देवीं पाण्डित्यं धनमद्भुतम्॥ ६६॥
पुत्रान् पौत्रान् सुखं कीर्तिं लभते जनवश्यताम्।

करनी चाहिए । फिर इन्द्रादि दशदिक्पालों की तथा उनके वज्र आदि आयुधों की पूजा करनी चाहिए ॥ ६४-६६ ॥

इस प्रकार देवी का पूजन करने से साधक अदभुत पाण्डित्य धन, पुत्र, पौत्र, सुख एवं कीर्त्ति प्राप्त करता है तथा जनसामान्य को अपने वश में करने की शक्ति प्राप्त करता है ॥ ६६-१०० ॥

विमर्श - ऊपर ४.८८ से ४.६६ पर्यन्त तारा के आवरण पूजा की विधि कही गई है उसका यथाक्रम संक्षेप इस प्रकार है -

पूर्वोक्त (द्र० ४. ८३-८६) रीति से देवी की पूजा कर योनिमुद्रा प्रदर्शित कर 'आवरणं ते पूजयामि, देवि आज्ञापय' मन्त्र पढ़कर देवी से आज्ञा ले आवरण पूजा करनी चाहिए ।

प्रथम पीठ के द्वार पर पाशांकुशो (द्र० ४.८६) से गणपति का ध्यान कर 'गणपतये नमः गणपतिं पूजयामि' इस मन्त्र से गणपति की पूजा करे । पुनः पीठ के दक्षिण द्वार पर 'कपाल शूले' (द्र० ४.६०) आदि श्लोक से ध्यान कर 'बटुक भैरवाय नमः' इस मन्त्र से बटुक भैरव की पूजा करे । पुनः पीठ के पश्चिम द्वार पर असिशूलकपालानि' (द्र० ४.६१) श्लोक से ध्यान कर 'क्षेत्रपालाय नमः' इस मन्त्र से क्षेत्रपाल की पूजा करे, पुनः पीठ के उत्तर दिशा में 'कपालं डमरुं पाशं' (द्र० ४.०२) इस श्लोक से ध्यान कर 'योगिनीभ्यो नमः' इस मन्त्र से योगिनियों की पूजा करनी चाहिए ।

पुनः पीठ के ऊपर 'ॐ अक्षोभ्य वज्रपुष्पं प्रतीच्छ स्वाहा' इस मन्त्र से अक्षोभ्य ऋषि का पूजन करना चाहिए । तदनन्तर केशरों के अग्नि कोण, ईशान कोण, वायव्य एवं नैऋत्य कोणों में तथा मध्य दिशा में इस प्रकार षडङ्ग पूजा करनी चाहिए । यथा -

ॐ ह्रां एकजटायै नमः, आग्नेये ।
ॐ ह्रीं तारिण्यै शिरसे स्वाहा, ईशान्ये ।
ॐ ह्रूं वज्रोदकायै शिखायै वषट्, वायव्ये ।
ॐ ह्रैं उग्रजटायै कवचाय हुं, नैर्ऋत्ये ।
ॐ ह्रौं महापरिसरायै नेत्रत्रयाय वौषट्, मध्ये ।
ॐ ह्रः पिङ्गोग्रैकजटायै अस्त्राय फट्, चतुर्दिक्ष ।

इसके अनन्तर पूर्वादि स्थित दलों की दिशाओं में स्थित अष्टदलों के कमलों में वैरोचनादि का तथा आग्नेयादि कोणों में स्थित दलों में लामका आदि का इस प्रकार पूजन करना चाहिए -

ॐ वं वैरोचन वज्रपुष्पं प्रतीच्छ स्वाहा ।
ॐ अं अमिताभ वज्रपुष्पं प्रतीच्छ स्वाहा ।
ॐ पं पद्मनाभ वज्रपुष्पं प्रतीच्छ स्वाहा ।
ॐ शं शंखनाभ वज्रपुष्पं प्रतीच्छ स्वाहा ।
ॐ लां लामिके वज्रपुष्पं प्रतीच्छ स्वाहा ।
ॐ मां मामिके वज्रपुष्पं प्रतीच्छ स्वाहा ।
ॐ पां पाण्डुरे वज्रपुष्पं प्रतीच्छ स्वाहा ।
ॐ तां तारके वज्रपुष्पं प्रतीच्छ स्वाहा ।

फिर भूपुर के चारों द्वारों पर यथाक्रम पूर्वादि दिशाओं में पूजन करे -

ॐ पं पद्मान्तक वज्रपुष्पं प्रतीच्छ स्वाहा ।
ॐ यं यमान्तकं वज्रपुष्पं प्रतीच्छ स्वाहा ।
ॐ विं विघ्नात्मक वज्रपुष्पं प्रतीच्छ स्वाहा ।
ॐ नां नारान्तक वज्रपुष्पं प्रतीच्छ स्वाहा ।

तदनन्तर चतुरस्र के पूर्व आदि दिशाओं में इन्द्रादि लोकपालों का यथाक्रम पूजन करना चाहिए -

ॐ लां इन्द्राय देवाधिपतये नमः, पूर्वे ।
ॐ रां अग्नये तेजाधिपतये नमः, आग्नेये ।
ॐ यां यमाय प्रेताधिपतये नमः, दक्षिणे ।
ॐ क्षां निर्ऋतये रक्षोधिपतये नमः, नैर्ऋत्ये ।
ॐ वां वरुणाय जलाधिपतये नमः पश्चिमे ।
ॐ यां वायवे प्राणाधिपतये नमः, वायव्ये ।
ॐ सां सोमाय ताराधिपतये नमः, उत्तरे ।
ॐ हां ईशानाय गणाधिपतये नमः, ईशाने ।
ॐ आं ब्रह्मणे प्रजाधिपतये नमः, पूर्वेशानयोर्मध्ये ।
ॐ ह्रीं अनन्ताय नागाधिपतये नमः, निर्ऋतिवरुणयोर्मध्ये ।

इसके बाद चतुरस्र के बाहर दश दिक्पालों के आयुधों का पूजन पूर्व आदि दिशाओं में करना चाहिए -

ॐ वज्राय नमः, पूर्वे, ॐ शक्तये नमः, आग्नेये, ॐ दण्डाय नमः, दक्षिणे, ॐ खड्गाय नमः, नैर्ऋत्ये, ॐ पाशाय नमः, पश्चिमे. ॐ अंकुशाय नमः, वायव्ये, ॐ गदायै नमः, उत्तरे, ॐ शूलाय नमः, ईशाने, ॐ पदमाय नमः, ऊर्ध्वम्, ॐ चक्राय नमः, अधः ।

इस प्रकार पाँच आवरणों की पृजा कर पाँच पुष्पाञ्जलि भगवति को

नित्यपूजान्ते बलिदानं द्विपञ्चाशदर्णमन्त्रः

तारो माया श्रीमदेकजटे नीलसरस्वति ॥ १०० ॥
महोग्रतारे देबालः सनेत्रो गदियुग्मकम् ।
सर्वभूतपिशाचकूर्मो दीर्घोग्निर्मेरुसान् ग्रसः ॥ १०१ ॥
ग्रभृगुर्ममजाड्यं च च्छेदयद्वितयं रमा ।
मायास्त्राग्निप्रियान्तोऽयं द्विपञ्चाशल्लिपिर्मनुः ॥ १०२ ॥
अनेन नित्यपूजान्तेऽन्वहं देव्यै बलिं हरेत् ।
एवं सिद्धे मनौ मन्त्री प्रयोगान्विदधीत च ॥ १०३ ॥
जातमात्रस्य बालस्य दिवसत्रितयादधः ।
जिह्वायां विलिखेन्मन्त्रं मध्वाज्याभ्यां शलाकया ॥ १०४ ॥

नित्यपूजान्ते बलिदानमन्त्रमाह – **तार इति** । तार ॐ । माया ह्रीं । वालो वः । सनेत्रयुतः वि । गदी खः । कूर्मश्चकारः । दीर्घोग्निः रा । मेरुः क्षः । भृगुः सः । रमा श्रीं । माया ह्रीं । अस्त्रं फट् । अग्निप्रिया स्वाहा । स्वरूपम् अन्यत् । यथा – ॐ ह्रीं श्रीमदेकजटे नीलसरस्वति महोग्रतारे देवि ख ख सर्वभूतपिशाचराक्षसान् ग्रस ग्रस मम जाड्यं छेदय छेदय श्रीं ह्रीं फट् स्वाहेति द्विपञ्चाशदर्णः ॥ १०० ॥ *॥ १०१–१०५ ॥

समर्पित करे ।

अब पूजा के उपरान्त **बलिदान मन्त्र का उद्धार** कहते हैं -

तार (ॐ), माया (ह्रीं), फिर, 'श्रीमदेकजटे नीलसरस्वति महोग्रतारे दे' फिर सनेत्र वाल (वि) फिर गदियुग्मक (ख ख), फिर 'सर्वभूतपिशा', फिर कूर्म (च), दीर्घ अग्नि (रा), मेरु (क्ष), फिर 'सान्', 'ग्रस ग्र' फिर भृगु (स), फिर 'मम जाड्यं' फिर २ बार छेदय शब्द, फिर रमा (श्रीं), माया (ह्रीं), अस्त्र (फट्) तथा अन्त में अग्निप्रिया (स्वाहा) लगाने से बावन अक्षरों का मन्त्र निष्पन्न होता है । इस मन्त्र से प्रतिदिन पूजा के बाद भगवती को बलि समर्पित करनी चाहिए । इस प्रकार मन्त्र सिद्धि होने पर साधक काम्य कर्म का अधिकारी हो जाता है ॥ १००-१०३ ॥

विमर्श - बलिदान मन्त्र का स्वरूप - ॐ ह्रीं श्रीमदेकजटे नीलसरस्वति महोग्रतारे देवि ख ख सर्वभूतपिशाचराक्षसान् ग्रस ग्रस मम जाड्यं छेदय छेदय श्रीं ह्रीं फट् स्वाहा ॥ १००-१०३ ॥

अब **काम्य प्रयोग** कहते हैं -

नवजात शिशु के उत्पन्न होने पर ३ दिनों के भीतर उसकी जिह्वा पर शहद एवं घी से (स्वर्ण निर्मित या श्वेत दूर्वा निर्मित) शलाका से तारा मन्त्र

सुवर्णकृतया यद्वा मन्त्री धवलदूर्वया ।
गतेऽष्टमेऽब्दे बालोऽसौ जायते कविराट् ध्रुवम् ॥ १०५ ॥
तथापरैरजेयोऽपि भूपसंघैर्धनार्चितः ।

तस्य मन्त्रस्य प्रयोगान्तरम्

उपरागे तदानीय तरद्दारुसरो जले ॥ १०६ ॥
निर्माय कीलकं तेन तैलमध्वमृतैर्लिखेत् ।
सरोजिनीदले मन्त्रं वेष्टयेन्मातृकाक्षरैः ॥ १०७ ॥
निखाय तद्दलं कुण्डे चतुरस्रे समेखले ।
संस्थाप्य पावकं तत्र जुहुयान्मनुनाऽमुना ॥ १०८ ॥
सहस्रं रक्तपद्मानां धेनुदुग्धजलाप्लुतम् ।
होमान्ते विविधैरन्नैः पलैरपि बलिं हरेत् ॥ १०९ ॥
बलिमन्त्रेण विधिवद् बलिमन्त्रः प्रकाश्यते ।

बलिदानेऽन्यः षोडशार्णमन्त्रः

तार पद्मेयुगं तन्द्रीवियद्दीर्घं च लोहितः ॥ ११० ॥

प्रयोगान्तरमाह – उपराग इति । ग्रहणे तडागे तरत्काष्ठं दतादन्तेनानीयते न लेखनीं कृत्वा तैलमधुसुधाभिः पद्मिनीपत्रे तया मनुम् आलिख्य मातृकावर्णैः संवेष्ट्य कुण्डं निखाय तदुपर्यग्निं प्रतिष्ठाप्य गोदुग्धाक्तेन रक्तपद्मसहस्रेण तत्र हुत्वा षोडशार्णेन मांसैर्होमान्ते बलिं दत्त्वा मध्यरात्रे पूर्वोक्तमन्त्रेण बलिं दद्यात् । एवं कृते उक्तफलसिद्धिः ॥ १०६ ॥ * ॥ १०७–१०९ ॥ षोडशार्णमाह – तार इति । तन्द्री मः । दीर्घवियत् हा । लोहितः पः । विषभगारूढो त्रिः मएयुतो दः द्मे । अनिलो झिंटीशाढ्यः यएयुतः ये । यथा – ॐ पद्मे पद्मे महापद्मे पद्मावतीये स्वाहेति ॥ ११० ॥ *॥ ११२ ॥

लिखना चाहिए । इस क्रिया के अनुष्ठान से ८ वर्ष व्यतीत हो जाने पर वह बालक निश्चित रूप से महाकवि बन जाता है तथा अन्य विद्वानों से अपराजित होकर राजपूजित हो जाता है ॥ १०४-१०६ ॥

ग्रहण के समय सरोवर में तैरते हुए काष्ठ की लेखनी बनावें फिर कमल के पत्ते पर तेल, मधु और मदिरा से तारा मन्त्र लिखकर मातृका (इक्यावन अक्षरों) वर्णों से उसे वेष्टित कर चौकोर मेखला वाले कुण्ड में उसे गाड़कर अग्निस्थापन कर तारामन्त्र से गोदुग्धमिश्रित जल से आप्लुत रक्त कमलों से एक हजार आहुतियाँ देवे । फिर विविध अन्न और मांस से विधिवत् भगवती तारा को बलिदान देना चाहिए । बलिदान का मन्त्र इस प्रकार है ॥ १०६-११० ॥

अत्रिर्विषभगारूढो वदेत्पद्मावतीपदम्।
झिण्टीशाढ्योऽनिलः स्वाहा षोडशार्णो[1] बलेर्मनुः॥ १११ ॥

अस्य मन्त्रस्य प्रयोगान्तराणि

ततो निशीथेऽपि बलिं पूर्वोक्तमनुना हरेत्।
एवं कृते पण्डितानामजेयः कविराड् भवेत्॥ ११२ ॥
निवासो भारती लक्ष्म्योर्जनतारञ्जनक्षमः।
शताभिजप्तां यो मन्त्री रोचनामलिके धरेत्॥ ११३ ॥
स यं पश्यति तस्यासौ दासवज्जायते क्षणात्।
श्मशानाङ्गारमाहृत्य शर्वर्यां कुजवासरे॥ ११४ ॥
कृष्णाम्बरेण सम्वेष्ट्य निबद्धं रक्ततन्तुभिः।
शताभिजप्तमूलेन निःक्षिपेद्वैरिवेश्मनि॥ ११५ ॥
उच्चाटयति सप्ताहात् सकुटुम्बान्विरोधिनः।
क्षाराढ्यनिशया मन्त्रं लिखित्वा पौरुषेऽस्थिनि॥ ११६ ॥

अलिके ललाटे धरेत् तिलकं कुर्यादित्यर्थः ॥ ११३ ॥ * ॥ ११४–११५ ॥ विरोधिनः शत्रून् उच्चाटयति निष्कासयति । क्षाराढ्यनिशया सैंधवयुक्तया हरिद्रया ॥ ११६–११७ ॥

तार (ॐ) फिर दो बार पद्मे शब्द (पद्मे पद्मे), फिर तन्द्री (म) दीर्घवियत् (हा) लोहित (प) वृषभगारुढोऽत्रिः म ए से युक्त द (अर्थात् द्मे) फिर 'पद्मावती' फिर झिण्टीशाढ्योऽनिलः य् ए से युक्त 'ये' तदनन्तर 'स्वाहा' यह सोलह अक्षरों का बलि मन्त्र निष्पन्न होता है ॥ ११०-१११ ॥

मन्त्र का स्वरूप - 'ॐ पद्मे पद्मे महापद्मे पद्मावतीये स्वाहा' ॥ ११०-१११ ॥

फिर निशीथ काल में भी पूर्वोक्त मन्त्र (द्र० ४.५०-५१) से बलि देनी चाहिए । ऐसा करने से साधक पण्डितों से अपराजेय एवं महाकवि हो जाता है। उसमें स्वयं लक्ष्मी एवं सरस्वती दोनों निवास करती हैं तथा वह समस्त जनसमूहों को प्रसन्न करने में सक्षम हो जाता है ॥ ११२-११३ ॥

तारा मन्त्र का १०० बार जप कर जो व्यक्ति गोरोचन का तिलक अपने ललाट पर धारण करता है वह जिसे देखता है, वह तत्काल उसका दास बन जाता है ॥ ११३-११४ ॥

मंगलवार के दिन रात्रि के समय श्मशान से अङ्गार लाकर काले कपड़े में उसे लपेट कर और लाल धागों से उसे बाँध कर मूल मन्त्र से १०० बार जप

---

१. ॐ पद्मे पद्मे महापद्मे पद्मावतीये स्वाहा इति षोडशार्णः ।

रविवारे निशीथिन्यां सहस्रमभिमन्त्रयेत् ।
तत्क्षिप्तं शत्रुसदने मण्डलाद्भ्रंशकं भवेत् ॥ ११७ ॥
क्षेत्रे क्षिप्तं सस्यहान्यैजवह्नतुरगालये ।

यन्त्रकथनं तत्फलानि च


षट्कोणमध्ये प्रविलिख्य मूलं
साध्यान्वितं केसरगस्वराढ्यम् ।
काद्यष्टवर्गान्वितपत्रमब्जं
लिखेद् बहिर्भूमिपुरेणवीतम् ॥ ११८ ॥
यन्त्रमेतल्लिखेद् भुर्जे रसेन जतुजन्मना ।
पीताम्बरेण सम्वेष्ट्य बध्नीयात्पीतसूत्रतः ॥ ११६ ॥

यन्त्रमाह – **षडिति** । षट्कोणे साध्यान्वितं मूलममुकं रक्ष रक्षेति युक्तं मूलमन्त्रं विलिख्य अष्टदलकेसरेषु अं आमित्यादि स्वराणां युग्मपत्रेषु क च ट त प य श लेति वर्गान् विलिख्य बहिश्चतुष्कोणेन वेष्टयेत् ॥ ११८ ॥ जतु जन्मनालाक्षोत्थेन रसेन ॥ ११६ ॥ *॥ १२०–१२३ ॥

कर शत्रु के घर में फेंक दे तो एक सप्ताह के भीतर शत्रु का परिवार सहित उच्चाटन हो जाता है ॥ ११४-१११६ ॥

रविवार को रात्रि में पुरुष की हडडी पर सैन्धव एवं हल्दी से मूल मन्त्र लिखकर १००० मन्त्रों से उसे अभिमन्त्रित कर शत्रु के घर में फेक देने से वह पदच्युत हो जाता है और खेत में फेकने से वहाँ फसल नहीं उगती तथा घोड़साल में फेंक देने से घोड़े मर जाते हैं ॥ ११६-११८ ॥

ताराधारणयन्त्रम्



तोयं वाय्वग्निकर्णेन्दुयुतं राजमुखीति च॥ ४२॥
राजाधिमुखिवश्यान्ते मुखिमायारमात्मभूः।
देवि देवि महादेवि देवाधिदेवि सर्व च॥ ४३॥
जनस्य च मुखं पश्चान्मम वशं कुरुद्वयम्।
वह्निप्रियान्तो मन्त्रोऽष्टचत्वारिंशल्लिपिर्मतः[1]॥ ४४॥
ऋषिच्छन्दो देवतास्तु पूर्ववत्परिकीर्तिताः।
हृदेकादशभिः प्रोक्तं शिरः स्यात्सप्तवर्णकैः॥ ४५॥

गौर्या मन्त्रान्तरमाह – **नभ** इति । नभो हकारः । कीदृक् नभः हसानलयुतम् । हसः सः । अनलो रः । ताभ्यां युतम् । ऐस्थं बिन्दुयुतम् । तेन ह्स्रैं । तोयं वः । कीदृक् वायुर्यः । अग्नी रः । कर्णः ऊः । इन्दुर्बिन्दुः । तैर्युतम् । व्यरूं । स्वरूपमन्यत् । माया ह्रीं । रमा श्रीं । आत्मभूः क्लीं । अन्यत्स्वरूपम् । वह्निप्रिया स्वाहा॥ ४२–४६॥

सूर्यमण्डल में विराजमान देवी के उक्त स्वरूप का ध्यान करते हुये जो व्यक्ति जप करता है अथवा १०८ आहुतियाँ प्रदान करता है वह व्यक्ति सारे जगत् को अपने वश में कर लेता है॥ ४१॥

अव **गौरी का अन्य मन्त्र** कहते हैं - हंस (स्), अनल (र), ऐकारस्थ शशांकयुत् (ऐं) उससे युक्त नभ (ह्) इस प्रकार ह्स्रैं, फिर वायु (य्), अग्नि (र), एवं कर्णेन्दु (ऊ) सहित तोय (व्), अर्थात् 'व्यूरुँ', फिर 'राजमुखि', 'राजाधिमुखिवश्य' के बाद 'मुखि', फिर माया (ह्रीं), रमा (श्रीं), आत्मभूत (क्लीं), फिर 'देवि देवि महादेवि देवाधिदेवि सर्वजनस्य मुखं' के बाद 'मम वशं' फिर दो बार 'कुरु कुरु' और इसके अन्त में वह्निप्रिया (स्वाहा) लगाने से अड़तालिस अक्षरों का मन्त्र निष्पन्न होता है॥ ४२-४३॥

विमर्श – मन्त्र का स्वरूप इस प्रकार है - 'ह्स्रैं व्यूरूँ राजमुखि राजाधि मुखि वश्यमुखि ह्रीं श्रीं क्ली दवि देवि महादेवि देवाधिदेवि सर्वजनस्य मुखं मम वशं कुरु कुरु स्वाहा'॥ ४२-४३॥

इस मन्त्र के ऋषि छन्द देवता आदि पूर्व में कह आये हैं मन्त्र के ग्यारह वर्णो से हृदय सात वर्णो से शिर चार वर्णो से शिखा चार वर्णो से कवच पाँच वर्णो से नेत्र

१. ह्स्रैं व्यूरूँ राजमुखि राजाधिमुखि वश्यमुखि ह्रीं श्रीं क्लीं देवि देवि महादेवि देवाधिदेवि सर्वजनस्य मुखं मम वशं कुरु कुरु स्वाहेत्यष्टचत्वारिंशदर्णः ।

शिखावर्मापि वेदार्णैः पञ्चभिर्नेत्रमीरितम् ।
अस्त्रं सप्तदशार्णैः स्याद्ध्यानजप्यादिपूर्ववत् ॥ ४६ ॥

वश्यकरमन्त्रषट्ककथनम्

अङ्गमन्त्रास्तु दीर्घाढ्य भुवनेशीपरा मताः ।
एवं सिद्धमनुर्मन्त्री प्रयोगान् कर्तुमर्हति ॥ ४७ ॥
कुर्यात् सर्वजनस्थाने मनोः साध्याभिधानकम् ।
जपे होमे तर्पणे च वशीकरणकर्मणि ॥ ४८ ॥
ससम्पातं घृतं हुत्वा सहस्रं सप्तवासरम् ।
सम्पाताज्यं तु साध्यस्य प्राशितं वश्यकारकम् ॥ ४६ ॥

अङ्गमन्त्राः – षट् । दीर्घयुक्मायाबीजं परं येषामीदृशाः ॥ ४७॥ मनोर्मन्त्रस्य सर्वजनस्थाने सर्वजनस्येति पदस्थाने साध्याऽभिधानकं साध्यनामोच्चरेत् देवदत्तस्य मुखमित्यादि ॥ ४८ ॥ *॥ ४६ ॥

तथा सत्रह वर्णो से अस्त्र न्यास करना चाहिए । पूवर्वत् जप ध्यान एवं पूजा भी करनी चाहिए । षड्दीर्घयुत् माया बीज प्रारम्भ में लगाकर षडङ्गन्यास के मन्त्रों की कल्पना कर लेनी चाहिए । इस प्रकार मन्त्र सिद्ध हो जाने पर साधक काम्य प्रयोग का अधिकारी होता है ॥ ४४-४७ ॥

विमर्श - विनियोग - 'अस्य श्रीगौरीमन्त्रस्य अजऋषिर्निचृद्गायत्रीछन्दः गौरीदेवता, ह्रीं बीजं स्वाहा शक्तिः ममाखिलकामनासिद्ध्यर्थे जपे विनियोगः' ।

षडङ्गन्यास - ह्रां स्त्रैं व्यूँ राजमुखि राजाधिमुखि हृदयाय नमः,
ह्रीं वश्यमुखि ह्रीं श्रीं क्लीं शिरसे स्वाहा,
हूँ देवि देवि शिखायै वषट्, हैं महादेवि कवचाय हुम,
ह्रौं देवाधिदेवि नेत्रत्रयाय वौषट्,
ह्रः सर्वजनस्य मुखं मम वशं कुरु कुरु स्वाहा अस्त्राय फट् ।

पूजाविधि - पहले श्लोक ६ - ३६ में वर्णित देवी के स्वरूप का ध्यान करे । अर्घ्य स्थापन, पीठशक्तिपूजन, देवी पूजन तथा आवरण देवताओं के पूजन का प्रकार पूर्वोक्त है ॥ ४५-४७ ॥

अब **वशीकरण के कुछ मन्त्र** कहते हैं -

वशीकरण मन्त्र के पूजन जप होम एवं तर्पण में मूल मन्त्र के 'सर्वजनस्य' पद के स्थान पर जिसे अपने वश में करना हो उस साध्य के षष्ठ्चन्त रूप को लगाना चाहिए । सात दिन तक सहस्र-सहस्र की संख्या में संपातपूर्वक (हुतावशेष स्रुवावस्थित घी का प्रोक्षणी में स्थापन) घी से होमकर उस संपात (संस्रव) घृत को साध्य व्यक्ति को पिलाने से वह वश में हो जाता है ॥ ४८-४६ ॥

साध्यनक्षत्रवृक्षे साध्याकृतिप्रयोग

साध्यनक्षत्रवृक्षेण कुर्यात्साध्याकृतिं शुभाम् ।
तस्यामसून् प्रतिष्ठाप्य प्राङ्गणे निखनेच्च ताम् ॥ ५० ॥
तत्रानलं समाधाय रक्तचन्दनसंयुतैः ।
जपापुष्पैर्निशीथिन्यां जुहुयात्सप्तवासरम् ॥ ५१ ॥
सहस्रं प्रत्यहं पश्चात्तां निष्कास्य सरित्तटे ।
निखनेत्साधकस्तस्य साध्यो दासो भवेद् ध्रुवम् ॥ ५२ ॥

प्रयोगान्तरमाह – **साध्यनक्षत्रेति** । साध्यस्य यन्नक्षत्रम् । जन्मनक्षत्रं तत्सम्बन्धी यो वृक्षस्तेन साध्याकृतिं साध्यप्रतिमां कुर्यात् । तत्र प्राणान् प्रतिष्ठाप्य । तामङ्गणे खात्वा तदुपर्यग्निं निधाय रक्तचन्दनाक्तैर्जपापुष्पैः सहस्रं हुत्वा तां निष्कास्य नदीतटे निखनेत् । स दासः स्यात् । 'नक्षत्रवृक्षा यथाः –

कारस्कारोथ धात्री स्यादुदुम्बरतरुः पुनः ।
जम्बूः खादिर कृष्णाख्यौ वंशपिप्पलसंज्ञकौ ।
नागरोहिणनामानौ पलाशप्लक्षसंज्ञकौ ।
अम्बष्ठबिल्वार्जुनाख्य यविकंकतमहीरुहाः ।
बकुलः सरलः सर्जोवंजुलः पनसार्ककौ ।
शमीकदम्बनिम्बाम्रामधूका वृक्षशाखिनः । इति शारदोक्ताः ॥ ५०–५२ ॥

साध्य व्यक्ति के जन्म नक्षत्र सम्बन्धी लकड़ी लेकर उसी से साध्य की प्रतिमा निर्माण करावे, फिर उसमें प्राणप्रतिष्ठा कर उस प्रतिमा को आँगन में गाड़ देवे ॥ ५० ॥

पुनः उसके ऊपर अग्निस्थापन कर मध्य रात्रि में सात दिन तक रक्तचन्दन मिश्रित जपा कुसुम के फूलों से प्रतिदिन इस मन्त्र से एक हजार आहुतियाँ प्रदान करे । इसके बाद उस प्रतिमा को उखाड़ कर किसी नदी के किनारे गाड़ देनी चाहिए, ऐसा करने से साध्य निश्चित रूप से वश में हो कर दासवत् हो जाता है ॥ ५०-५२ ॥

विमर्श – जन्म नक्षत्रों के वृक्षों की तालिका –

नक्षत्र	वृक्ष	नक्षत्र	वृक्ष
१ – अश्विनी	कारस्कर	९ – आश्लेषा	नाग
२ – भरणी	धात्री	१० – मघा	रोहिणी
३ – कृत्तिका	उदुम्बर	११ – पू.फा.	पलाश
४ – रोहिणी	जम्बू	१२ – उ.फा.	प्लक्ष
५ – मृगशिरा	खदिर	१३ – हस्त	अम्बष्ठ
६ – आर्द्रा	कृष्ण	१४ – चित्रा	विल्व
७ – पुनर्वसु	वंश	१५ – स्वाती	अर्जुन
८ – पुष्य	पिप्पल	१६ – विशाखा	विकंकत

ज्येष्ठालक्ष्मीमन्त्रः

ज्येष्ठालक्ष्मी महामन्त्रः प्रोच्यते धनवृद्धिदः ।
वाग्बीजं भुवनेशानी श्रीरनन्तोद्यलक्ष्मि च ॥ ५३ ॥
स्वयम्भुवे शम्भुजाया ज्येष्ठायै हृदयान्तिकः ।
मनुः[1] सप्तदशार्णोऽयं मुनिर्ब्रह्मास्य[2] कीर्तितः ॥ ५४ ॥
छन्दोऽष्टिर्ज्येष्ठलक्ष्मीस्तु देवता शक्तिबीजके ।
श्रीमाये मूलतो हस्तौ प्रमृज्याङ्गं समाचरेत् ॥ ५५ ॥

ज्येष्ठालक्ष्मीमन्त्रमाह – **वागिति** । वाग्बीजं ऐं । भुवनेशानी ह्रीं । श्रीः श्रीं । अनन्त आ । द्यलक्ष्मिस्वरूपम् ॥ ५३ ॥

स्वयम्भुवे स्वरूपम् । शम्भुजाया ह्रीं । ज्येष्ठायै स्वरूपम् । हृदयं नमः ॥ ५४ ॥ श्रीं शक्तिः ॥ ह्रीं बीजं ॥ ५५ ॥

---

१७ - अनुराधा	वकुल	२३ - धनिष्ठा	शमी
१८ - ज्येष्ठा	सरल	२४ - शतभिषा	कदम्ब
१९ - मूल	सर्ज	२५ - पू.भा.	निम्ब
२० - पू.षा.	वञ्जुल	२६ - उ.भा.	आम्र
२१ - उ.षा.	पनस	२७ - रेवती	मधूक
२२ - श्रवण	अर्क		

अब **ज्येष्ठा लक्ष्मी का मन्त्रोद्धार** कहते हैं -

वाग्बीज (ऐं), भुवनेशी (ह्रीं), श्री (श्रीं), अनन्त (आ), फिर 'द्यलक्ष्मि', फिर 'स्वयंभुवे', फिर शम्भुजाया (ह्रीं), तदनन्तर 'ज्येष्ठायै' अन्त में हृदय (नमः) लगाने से सत्रह अक्षरों का धन की वृद्धि करने वाला मन्त्र बनता है ॥ ५३-५४ ॥

विमर्श - मन्त्र का स्वरूप इस प्रकार है - 'ऐं ह्रीं श्रीं आद्यलक्ष्मि स्वयंभुवे ह्रीं ज्येष्ठायै नमः'॥ ५३-५४ ॥

अब **विनियोग** कहते हैं - इस मन्त्र के ब्रह्मा ऋषि हैं, अष्टि छन्द है, ज्येष्ठा लक्ष्मी देवता हैं, श्री बीज है तथा माया शक्ति है । मूल मन्त्र से हस्त प्रक्षालन कर बाद में अङ्गन्यास करना चाहिए ॥ ५४-५५ ॥

विमर्श - विनियोग का स्वरूप इस प्रकार है -

'अस्य श्रीज्येष्ठालक्ष्मीमन्त्रस्य ब्रह्माऋषिरष्टिच्छन्दः ज्येष्ठालक्ष्मीदेवता ममाभीष्टसिद्ध्यर्थे जपे विनियोगः' ॥ ५४-५५ ॥

---

१. ऐं ह्रीं श्रीं ज्येष्ठालक्ष्मीस्वयंभुवे ह्रीं ज्येष्ठायै नम इतिसप्तदशार्ण ।

२. अस्य श्रीज्येष्ठालक्ष्मीमन्त्रस्य ब्रह्माऋषिरष्टिच्छन्दः ज्येष्ठालक्ष्मीदेवता ममाभीष्टसिद्ध्यर्थे जपे विनियोगः ।

मन्त्राक्षरन्यासकथनम्

रामवेदयुगैकत्रिनेत्रार्णैर्मनुसम्भवैः ।
पदानामष्टकं न्यस्येच्छिरो भ्रूमध्यवक्त्रके ॥ ५६ ॥
हृन्नाभ्याधारके जानुपादयोस्तत्पदोन्मितिः ।
भूचन्द्रैकचतुर्वेदभूमिरामाक्षिवर्णकैः ॥ ५७ ॥

ध्यानं पीठदेवतागायत्र्यादिकथनम्

उद्यद्भास्करसन्निभा स्मितमुखी रक्ताम्बरालेपना,
सत्कुम्भं धनभाजनं सृणिमथो पाशङ्करैर्बिभ्रती ।
पद्मस्था कमलेक्षणा दृढकुचा सौन्दर्यवारांनिधि–
र्ध्यातव्या सकलाभिलाषफलदा श्रीज्येष्ठलक्ष्मीरियम् ॥ ५८ ॥
लक्षं जपेत् पायसेन जुहुयात् तद्दशांशतः ।
आज्याक्तेन यजेत्पीठे वक्ष्यमाणे महाश्रियम् ॥ ५९ ॥

पदोन्मितिः पदवर्णसंख्याभूरित्यादिवर्णैर्ज्ञेया ॥ ५६–५७ ॥ ध्यानमाह – उद्यदिति । धनपात्रांकुशौ दक्षिणयोः कुम्भपाशौ वामयोः ॥ ५८–५९ ॥

मन्त्र के ३, ४, ४, १, ३ एवं २ वर्णो से षडङ्गन्यास करना चाहिए तथा १, १, १, ४, ४, १, ३, एवं दो वर्णो से शिर भ्रूमध्य, मुख, हृदय, नाभि मूलाधार जानु एवं पैरों का न्यास करना चाहिए ॥ ५६-५७ ॥

विमर्श – षडङ्गन्यास – ऐं ह्रीं श्रीं हृदयाय नमः, आद्यलक्ष्मी शिरसे स्वाहा, स्वयंभुवे शिखायै वषट् ह्रीं कवचाय हुम् ज्येष्ठायै नेत्रत्रयाय वौषट् नमः अस्त्राय फट् ।

सर्वाङ्गन्यास यथा – ऐं नमः शिरसि, ह्रीं नमः भ्रूमध्ये,
श्रीं नमः मुखे, आद्यलक्ष्मि नमः हृदि स्वयंभुवे नमः नाभौ
ह्रीं नमः मूलाधारे, ज्येष्ठायै नमः जान्वोः नमोः नमः पादयोः ॥ ५६-५७ ॥

अव **ज्येष्ठा लक्ष्मी का ध्यान** कहते हैं – उदीयमान सूर्य के समान लाल आभावाली, प्रहसितमुखी, रक्त वस्त्र एवं रक्त वर्ण के अङ्गरागों से विभूषित, हाथों में कुम्भ धनपात्र, अंकुश एवं पाश को धारण किये हुये, कमल पर विराजमान, कमलनेत्रा, पीन स्तनों वाली, सौन्दर्य के सागर के समान, अवर्णनीय सुन्दरता से युक्त, अपने उपासकों के समस्त अभिलाषाओं को पूर्ण करने वाली श्री ज्येष्ठा लक्ष्मी का ध्यान करना चाहिए ॥ ५८ ॥

उक्त मन्त्र का एक लाख जप करे तथा घी मिश्रित खीर से उसका दशांश होम करे फिर वक्ष्यमाण पीठ पर महागौरी का पूजन करना चाहिए ॥ ५९ ॥

लोहिताक्षीविरूपा च करालीनीललोहिता ।
समदावारुणीपुष्टिरमोघाविश्वमोहिनी ॥ ६० ॥
तत्पीठशक्तयः प्रोक्ता दिक्षु मध्ये च ता यजेत् ।
प्रयच्छेदासनं तस्यै गायत्र्या वक्ष्यमाणया ॥ ६१ ॥
प्रणवो रक्तज्येष्ठायै विद्महे पदमन्ततः ।
नीलज्येष्ठापदं पश्चाद्यै धीमहि ततः पदम् ॥ ६२ ॥
तन्नो लक्ष्मीः पदं प्रोच्य चोदयादिति चोच्चरेत् ।
गायत्र्येषा[1] समाख्याता केसरेष्वङ्गपूजनम् ॥ ६३ ॥
मातरः पत्रमध्येषु बाह्ये लोकेशहेतयः ।
इत्थं जपादिभिः सिद्धो मनुर्दद्यादभीप्सितम् ॥ ६४ ॥

पीठशक्तीराह – **लोहिताक्षीति** ॥ ६०–६१ ॥ गायत्रीमाह – **प्रणव** इति । स्पष्टम् ॥ ६२–६३ ॥ लोकेशा इन्द्रादयः । हेतयो वज्राद्याः ॥ ६४ ॥

---

१. लोहिताक्षी, २. विरूपा, ३. कराली, ४. नीललोहिता, ५. समदा, ६. वारुणी, ७. पुष्टि, ८. अमोघा, एवं ९. विश्वमोहिनी - ये ज्येष्ठापीठ की नवशक्तियाँ कही गयी हैं । इनका पूजन आठ दिशाओं में तथा मध्य में करना चाहिए । तदनन्तर वक्ष्यमाण गायत्री मन्त्र से ज्येष्ठा को आसन देना चाहिए ॥ ६०-६१ ॥

प्रणव (ॐ) फिर 'रक्तज्येष्ठायै विद्महे' तदनन्तर 'नीलज्येष्ठा' पद के पश्चात् 'यै धीमहि', उसके बाद 'तन्नो लक्ष्मी' पद, फिर 'प्रचोदयात्' - यह ज्येष्ठा का गायत्री मन्त्र कहा गया है ॥ ६२-६३ ॥

विमर्श - मन्त्र का स्वरूप इस प्रकार है - 'ॐ रक्तज्येष्ठायै विद्महे नीलज्येष्ठायै धीमहि । तन्नो लक्ष्मी प्रचोदयात्' ॥ ६२-६३ ॥

केशरों में अङ्गपूजा, अष्टपत्रों पर मातृकाओं की, फिर उसके बाहर लोकपालों एवं उनके अस्त्रों की पूजा करनी चाहिए । इस प्रकार जप आदि से सिद्ध मन्त्र मनोवाञ्छित फल देता है (द्र० ९. ३८) ॥ ६३-६४ ॥

विमर्श - पीठ पूजा विधि - साधक ९. ५८ में वर्णित ज्येष्ठा लक्ष्मी के स्वरूप का ध्यान करे, फिर मानसोपचार से पूजन कर प्रदक्षिण क्रम से पीठ की शक्तियों का पूर्वादि आठ दिशाओं में एवं मध्य में इस प्रकार पूजन करे ।

ॐ लोहिताक्ष्यै नमः पूर्वे, ॐ दिव्यायै नमः आग्नेये,
ॐ कराल्यै नमः दक्षिणे, ॐ नीललोहितायै नमः नैर्ऋत्ये,
ॐ समदायै नमः पश्चिमे, ॐ वारुण्यै नमः वायव्ये,
ॐ पुष्टयै नमः उत्तरे, ॐ अमोघायै नमः ऐशान्ये,

---

१. ॐ रक्तज्येष्ठायै विद्महे नीलज्येष्ठायै धीमहि । तन्नो लक्ष्मीः प्रचोदयात् ।

अन्नदमन्त्रकथनम्

अथान्नदमनोर्वक्ष्ये साधनं यः पुरोदितः ।
अन्नपूर्णावृतौ भूमिश्रीयागे द्वियमाक्षरः ॥ ६५ ॥
तारभूश्रीपुटो[1] जप्यो मुनिरस्य[2] चतुर्मुखः ।
छन्दो निचृतिराख्यातं देवते वसुधाश्रियौ ॥ ६६ ॥
भूबीजं बीजमस्योक्तं श्रीबीजं शक्तिरीरिता ।
अन्नं महीति हृदयमन्नं मे देहि मस्तकम् ॥ ६७ ॥

अन्नदमन्त्रमाह – **अथेति** । यो मन्त्रः अन्नपूर्णावरणपूजने भूमिश्रियोः पूजने द्वियमाक्षरो द्वाविंशत्यर्णः पुरा कथितः सोन्नदो मनुः । अन्नं मह्यन्नं मे देह्यन्नाधिपतये ममान्नं प्रदापय स्वाहेति सप्रणव भूबीजश्रीबीजसम्पुटोऽ–ष्टाविंशतिवर्णः ॥ ६५–६६ ॥

ॐ विश्वमोहिन्यै नमः मध्ये

तदनन्तर 'ॐ रक्तज्येष्ठायै विद्महे नीलज्येष्ठायै धीमहि । तन्नो लक्ष्मी प्रचोदयात्' इस गायत्री मन्त्र से उक्त पूजित पीठ पर देवी को आसन देवे । फिर यथोपचार देवी का पूजन कर पुष्पाञ्जलि प्रदान कर उनकी अनुज्ञा ले आवरण पूजा करे । सर्वप्रथम केशरों में षडङ्गपूजा -

ॐ ऐं ह्रीं श्रीं हृदयाय नमः, आद्यलक्ष्मि शिरसे स्वाहा, स्वयंभुवे शिखायै वषट्, ह्रीं कवचाय हुम् ज्येष्ठायै नेत्रत्रयाय वौषट्, स्वाहा अस्त्राय फट् । तदनन्तर अष्टदल में ब्राह्मी आदि देवताओं की, भूपुर के भीतर इन्द्रादि दश दिक्पालों की तथा बाहर उनके वज्रादि आयुधों की पूर्ववत् पूजा करनी चाहिए (द्र. ६. ३८) । आवरण पूजा के पश्चात् देवी का धूप दीपादि से उपचारों से पूजन कर जप प्रारम्भ करे ।

इस प्रकार पूजन सहित पुरश्चरण करने से मन्त्र सिद्ध होता है और साधक को अभिमत फल प्रदान करता है ॥ ६३-६४ ॥

अब **अन्नपूर्णा के अन्य मन्त्र** को कहता हूँ - अन्नपूर्णा के आवरण पूजा में भूमि एवं श्री के पूजनार्थ बाइस अक्षरों का मन्त्र हम पहले कह चुके हैं (द्र. ९. १६-१७) ॥ ६५ ॥

उसी को तार (ॐ), भू (ग्लौं), एवं श्री (श्रीं) से संपुटित कर जप करना चाहिए । इस अन्नदायक मन्त्र की साधना का प्रकार कहते हैं । इस मन्त्र के ब्रह्मा ऋषि हैं, निचृद् गायत्री छन्द है, श्री एवं वसुधा इसके देवता हैं, ग्लौं इसका बीज है तथा श्रीं

---

१. ॐ ग्लौं श्रीं अन्नं मह्यन्नं मे देह्यन्नाधिपतये ममान्नं प्रदापय स्वाहा श्रीं ग्लौं श्रीमित्यष्टाविंशत्यर्णः ।

२. अस्य श्रीज्येष्ठालक्ष्मीमन्त्रस्य ब्रह्माऋषिः निचृद्गायत्रीछन्दः वसुधाश्रियौदेवते ग्लौंबीजंह्रीं शक्तिः ममाभीष्ट प्राप्तौ जपे विनियोगः ।

शिखात्वन्नाधिपतये ममान्नं च प्रदापय।
वर्मोक्तं स्वाहया चास्त्रमङ्गमन्त्राध्रुवादिकाः ॥ ६८ ॥
षड्दीर्घारूढभूमिश्रीबीजान्ताः परिकीर्तिताः।
विनेत्रा अपदुग्धाब्धौ स्वर्णदीपे तु ते स्मरेत् ॥ ६६ ॥
कल्पद्रुमाधोमणिवेदिकायां
समास्थिते वस्त्रविभूषणाढ्ये ।
भूमिश्रियौ वाञ्छितवामदक्षे
संचिन्तयेद् देवमुनीन्द्रवन्द्ये ॥ ७० ॥

षडङ्गमाह – अन्नं महीति । षडङ्गमन्त्राः । घ्रुवादिकाः प्रणवाद्याः । दीर्घयुक्ते भूश्रीबीजे अन्ते येषां ते । विनेत्रा नेत्रहीनाः पञ्चैव । पञ्चाङ्गानि मनोर्यत्र तत्र नेत्रमनुं त्यजेदित्युक्तेः । ॐ अन्नं महि ग्लां श्रीं हृत् । ॐ अन्नं देहि ग्लीं श्रीं शिर इत्यादि ॥ ६७–७१ ॥

शक्ति है ॥ ६६-६७ ॥

विमर्श – मन्त्र का स्वरूप इस प्रकार है – 'ॐ ग्लौं श्रीं अन्नं मह्यन्नं मे देह्यन्नाधिपतये ममान्नं प्रदापय स्वाहा श्रीं ग्लौं ॐ ।'

विनियोग – 'ॐ अस्य श्रीज्येष्ठालक्ष्मीमन्त्रस्य ब्रह्माऋषिर्निचृद्गायत्रीछन्दः वसुधाश्रियौ देवते ग्लौं बीजं श्रीं शक्तिः मनोकामनासिद्ध्यर्थे जपे विनियोगः' ॥ ६६-६७ ॥

अब **न्यास विधि** कहते हैं – 'अन्नं महि' से हृदय, 'अन्नं मे देहि' से शिर, 'अन्नाधिपतये' से शिखा, 'ममान्नं प्रदापय' से कवच तथा 'स्वाहा' से अस्त्र का न्यास करना चाहिए । इन मन्त्रों के प्रारम्भ में ध्रुव (ॐ) तथा अन्त में षड्दीर्घ सहित भूमिबीज एवं श्री बीज लगाना चाहिए । यह न्यास नेत्र को छोड़कर मात्र पाँच अङ्गों में किया जाता है । न्यास के बाद क्षीरसागर में स्वर्णद्वीप में वसुधा एवं श्री का ध्यान वक्ष्यमाण (६. ७०) श्लोक के अनुसार करे ॥ ६८-६६ ॥

विमर्श – पञ्चाङ्गन्यास विधि – 'पञ्चाङ्गानि मनोर्यत्र तत्र नेत्रमनुं त्यजेत्' जहाँ पञ्चाङ्गन्यास कहा गया हो वहाँ नेत्रन्यास न करे । इस नियम के अनुसार नेत्र को छोड़कर इस प्रकार पञ्चाङ्गन्यास करना चाहिए ।

ॐ अन्नं महि ग्लां श्रीं हृदयाय नमः, ॐ अन्नं मे देहि ग्लीं श्रीं शिरसे स्वाहा,
ॐ अन्नाधिपतये ग्लूं श्रीं शिखायै वषट्, ॐ ममान्नं प्रदापय ग्लैं श्रीं कवचाय हुं,
ॐ स्वाहा ग्लौं ग्लः श्रीं अस्त्राय फट् ॥ ६८-६६ ॥

अब **भूमि एवं श्री का ध्यान** कहते हैं –

कल्पद्रुम के नीचे मणिवेदिकापर ज्येष्ठा लक्ष्मी के बायें एवं दाहिने भाग में विराजमान वस्त्र एवं आभूषणों से अलंकृत तथा देवता एवं मुनिगणों से वन्दित भूमि का एवं श्री का ध्यान करना चाहिए ॥ ७० ॥

लक्षमेकं जपेन्मन्त्रं तद्दशांशं घृतप्लुतैः ।
अन्नैर्हुत्वा यजेत् पीठे वैष्णवे वसुधाश्रियौ ॥ ७१ ॥

वैष्णवीया अष्टपीठशक्तयः

विमलोत्कर्षिणी ज्ञानक्रियायोगाभिधा तथा ।
प्रह्वी सत्या तथेशानानुग्रहापीठशक्तयः ॥ ७२ ॥
तारं नमो भगवते विष्णवे सर्ववर्णकाः ।
भूतात्मसयोगपदं योगपद्मपदं ततः ॥ ७३ ॥
पीठात्मने नमोऽन्तोऽयं पीठस्य मनुरीरितः ।
दद्यादासनमन्तेन मूलेनावाहनादिकम् ॥ ७४ ॥

वैष्णवीपीठशक्तीराह – **विमलेति** ॥ ७२ ॥ पीठमन्त्रमाह – **तारमिति** । ॐ नमो भगवते विष्णवे सर्वभूतात्मसंयोगयोगपद्मपीठात्मने नमः ॥ ७३ ॥ * ॥ ७४–७६ ॥

उक्त मन्त्र का एक लाख जप करना चाहिए तथा घी मिश्रित अन्न से उसका दशांश होम करना चाहिए । तदनन्तर वैष्णव पीठ पर वसुधा एवं श्री का पूजन करना चाहिए ॥ ७१ ॥

१. विमला, २. उत्कर्षिणी, ३. ज्ञाना, ४. क्रिया, ५. योगा, ६. प्रह्वी, ७. सत्या, ८. ईशाना एवं ९. अनुग्रहा ये नव पीठशक्तियाँ हैं ॥ ७२ ॥

तार (ॐ), फिर 'नमो भगवते विष्णवे सर्व' के बाद 'भूतात्मसंयोग' पद, फिर 'योगपद्म' पद, तदनन्तर 'पीठात्मने नमः' यह पीठ पूजा का मन्त्र कहा गया है । इस मन्त्र से आसन देकर मूल मन्त्र से आवाहनादि पूजन करना चाहिए ॥ ७३-७४ ॥

विमर्श - पीठ पर आसन देने के **मन्त्र का स्वरूप** इस प्रकार है - 'ॐ नमो भगवते विष्णवे सर्वभूतात्मसंयोगयोगपद्मपीठात्मने नमः' ।

पीठ पूजा करने के बाद उसके केशरों में पूर्वादि आठ दिशाओं के प्रदक्षिण क्रम से आठ पीठ शक्तियों की तथा मध्य में नवम अनुग्रह शक्ति की इस प्रकार पूजा करे ।

१ - ॐ विमलायै नमः पूर्वे
२ - ॐ उत्कर्षिण्यै नमः आग्नेये
३ - ॐ ज्ञानायै नमः दक्षिणे
४ - ॐ क्रियायै नमः नैर्ऋत्ये
५ - ॐ योगायै नमः पश्चिमे
६ - ॐ प्रह्व्यै नमः वायव्ये
७ - ॐ सत्यायै नमः उत्तरे
८ - ॐ ईशानायै नमः ऐशान्ये
९ - ॐ अनुग्रहायै नमः मध्ये

इस प्रकार पीठ के आठों दिशाओं में तथा मध्य में पूजन करने के बाद ॐ नमो भगवते विष्णवे सर्वभूतात्मसंयोगयोगपद्मपीठात्मने नमः इस मन्त्र से भूमि और श्री इन दोनों देवियों को उक्त पूजित पीठ पर आसन देवे । फिर (९. ७०) में वर्णित उनके स्वरूप का ध्यान कर, मूलमन्त्र से आवाहन कर, मूर्त्ति की कलपना कर, पाद्य आदि

अङ्गानीष्ट्वार्चयेद्दिक्षु भूवह्निजलमारुतान्।
विवृतिं च प्रतिष्ठां च विद्यां शान्तिविदिक्षु च ॥ ७५ ॥

बलाकादयोऽन्या अष्टशक्तयः

अष्टशक्तीर्बलाका च विमलाकमला तथा।
वनमालाबिभीषा च मालिका शाङ्करी पुनः ॥ ७६ ॥
पूर्वादिदिक्षु प्रयजेदष्टमीं वसुमालिका।
शक्राद्यानायुधैर्युक्तान् स्वस्वदिक्षु समर्चयेत् ॥ ७७ ॥

उपचार संपादन कर, पुष्पाञ्जलि प्रदान कर उनकी अनुज्ञा ले आवरण पूजा प्रारम्भ कर, प्रदक्षिणा क्रम से प्रथम केशरों में अङ्गपूजा करे ॥ ७३-७४ ॥

प्रथम केशरों में अङ्गपूजा करने के पश्चात् पूर्वादि दिशाओं में प्रदक्षिण क्रम से भूमि, अग्नि, जल और वायु की पूजा करे । तदनन्तर चारों कोणों में निवृत्ति, प्रतिष्ठा, विद्या और शान्ति की पूजा करे ॥ ७५ ॥

फिर १. बलाका, २. विमला, ३. कमला, ४. वनमाला, ५. विभीषा, ६. मालिका, ७. शाकंरी और ८. वसुमालिका की पूर्वादि दिशाओं में स्थित अष्टदल में पूजा करे । तदनन्तर भूपुर के भीतर आठों दिशाओं में इन्द्रादि दश दिक्पालों की और भूपुर के बाहर आठों दिशाओं में उनके वज्रादि आयुधों की पूजा करनी चाहिए ॥ ७६-७७ ॥

विमर्श - आवरण पूजा विधि - सर्वप्रथम केशरों में अङ्गपूजा यथा -

१ - ॐ अन्नं महि ग्लां श्रीं हृदयाय नमः
२- ॐ अन्नं देहि ग्लूं श्रीं शिखायै वषट्
३- ॐ अन्नं देहि ग्लीं श्रीं शिरसे स्वाहा
४- ॐ ममान्नं प्रदापय ग्लै श्रीं कवचाय हुम
५- ॐ स्वाहा ग्लौं ग्लः श्रीं अस्त्राय फट् ।

फिर यन्त्र के पूर्वादि दिशाओं में भूमि आदि की पूजा यथा -

ॐ लं भूम्यै नमः पूर्वे   ॐ रं अग्नेये नमः दक्षिणे
ॐ वं अद्भ्यो नमः पश्चिमे   ॐ यं वायवे नमः उत्तरे

तत्पश्चात् आग्नेयादि कोणों में निवृत्ति आदि की यथा -

ॐ निवृत्यै नमः आग्नेये,   ॐ प्रतिष्ठायै नमः नैर्ऋत्यै,
ॐ विद्यायै नमः वायव्ये,   ॐ शान्त्यै नमः ऐशान्ये ।

इसके बाद अष्टदलों में पूर्वादि दिशाओं के क्रम से बलाका आदि की पूजा करनी चाहिए । यथा -

१ - ॐ बलाकायै नमः पूर्वे   ५ - ॐ विभीषायै नमः पश्चिमे
२ - ॐ विमलायै नमः आग्नेये   ६ - ॐ मालिकायै नमः वायव्ये
३ - ॐ कमलायै नमः दक्षिणे   ७ - ॐ शाङ्कर्यै नमः उत्तरे
४ - ॐ वनमालायै नमः नैर्ऋत्ये   ८ - वसुमालिकायै नमः ऐशान्ये

इत्थं सपरिवारे योऽधरालक्ष्म्यौ जपादिभिः ।
आराधयेत् स लभते महतीमन्नसम्पदम् ॥ ७८ ॥
आज्याक्तैश्च तिलैर्बिल्वसमिदि्भर्जुहुयाच्छ्रिये ।
साज्येन पायसेनापि फलैः पत्रैश्च बिल्वजैः ॥ ७६ ॥
जपतामुं महामन्त्रं होमकार्यो दिने दिने ।
दशसंख्यः कुबेरस्य मनुनेध्मैर्वटोद्भवैः ॥ ८० ॥

कुबेरमन्त्रोद्धारः ध्यानादि च

तारो वैश्रवणायाग्निप्रियान्तोऽष्टाक्षरो मनुः[1] ॥ ८१ ॥
होमकाले कुबेरं तु चिन्त्येदग्निमध्यगम् ।
धनपूर्णं स्वर्णकुम्भं तथा रत्नकरण्डकम् ॥ ८२ ॥
हस्ताभ्यां विप्लुतं खर्वकरपादं च तुन्दिलम् ।
वटाधस्ताद्रत्नपीठोपविष्टं सुस्मिताननम् ॥ ८३ ॥

इध्मैस्समिदि्भः ॥ ८० ॥ कुबेरमन्त्रमाह – **तार इति** । तार ॐ । अग्निप्रिया स्वाहा ॥ ८१ ॥ कुबेरध्यानमाह – **धनेति** । रत्नकरण्डो दक्षे ॥ ८२–८४ ॥

इसके बाद भूपुर के भीतर पूर्वादि दिशाओं के प्रदक्षिण क्रम से इन्द्रादि दश दिक्पालों को तथा बाहर उनके वज्रादि आयुधों की पूजा कर गन्ध धूपादि द्वारा वसुधा और महाश्री की पूजा करे (फिर जप करे) ॥ ७६-७७ ॥

इस प्रकार जो व्यक्ति अपने परिवार के साथ वसुधा एवं महालक्ष्मी का जप पूजनादि के द्वारा आराधना करता है वह पर्याप्त धनधान्य प्राप्त करता है ॥ ७८ ॥

श्री की प्राप्ति के लिए साधक घृत मिश्रित तिलों से बिल्व वृक्ष की समिधाओं से घी मिश्रित खीर से तथा बिल्वपत्र एवं बेल के गुद्दा से हवन करे ॥ ७६ ॥

अब **कुबेर के विषय में** कहते हैं - कुबेर का मन्त्र जपते हुये प्रतिदिन कुबेर मन्त्र से वटवृक्ष की समिधाओं में दश आहुतियाँ प्रदान करे ॥ ८० ॥

तार (ॐ), फिर 'वैश्रवणाय', फिर अन्त में अग्निप्रिया (स्वाहा) लगा देने पर आठ अक्षरों का कुबेर मन्त्र बनता है । यथा - 'ॐ वैश्रवणाय स्वाहा' ॥ ८१ ॥

होम करते समय अग्नि के मध्य में कुबेर का इस प्रकार ध्यान करे -

अपने दोनों हाथों से धनपूर्ण स्वर्णकुम्भ तथा रत्न करण्डक (पात्र) लिए हुये उसे उड़ेल रहे हैं । जिनके हाथ एवं पैर छोटे छोटे हैं, पेट तुन्दिल (मोटा) है जो वटवृक्ष के नीचे रत्नसिंहासन पर विराजमान हैं और प्रसन्नमुख हैं । इस प्रकार ध्यान पूर्वक होम करने से साधक कुबेर से भी अधिक संपत्तिशाली हो जाता है ॥ ८२-८४ ॥

---

१. ॐ वैश्रवणाय स्वाहेत्यष्टार्णः ।

एवं कृत हुतो मन्त्री लक्ष्म्या जयति वित्तपम् ।

प्रत्यङ्गिरामन्त्रः

अथ प्रत्यङ्गिरां वक्ष्ये परकृत्या विमर्दिनीम् ॥ ८४ ॥
दीर्घेन्दुयुग्मरुद्ब्रह्मामांसलोहितसंस्थिताम् ।
यन्तिनोरय उच्चार्य क्रूरां कृत्यां समुच्चरेत् ॥ ८५ ॥
वधूमिव पदं पश्चात्तान् ब्रह्मान्तेसदीर्घणः ।
अपनिर्णुद्म इत्यन्ते प्रत्यक्कर्तारमृच्छतु ॥ ८६ ॥
तारमायापुटो मन्त्रः स्यात्सप्तत्रिंशदक्षरः[1] ।
ब्रह्मानुष्टुप्मुनिश्छन्दो[2] देवी प्रत्यङ्गिरेरिता ॥ ८७ ॥
बीजशक्तितारमाये कृत्या नाशे नियोजनम् ।
अष्टभिस्तोयनिधिभिर्युगैर्वेदैश्च पञ्चभि ॥ ८८ ॥

प्रत्यङ्गिरामाह – **दीर्घेति** । मरुत् यकारः । दीर्घेन्दुयुक् । आबिन्दुयुतः यां । ब्रह्मा कः । लोहितः पः । तत्संस्थं मांसं लः । ल्प । यन्तिनोऽरयः । क्रूरां कृत्यां वधूमिव तां ब्रह्मस्वरूपम् । सदीर्घो णः णा । अपनिर्णुद्म इति स्वरूपम् । प्रत्यक्कर्तारमृच्छतु स्वरूपम् । प्रणवमायाबीजसम्पुटः ॥ ८५–८७ ॥ षडङ्गमाह – **अष्टभिरिति** । तोयनिधिभिश्चतुर्भिः । दीर्घयुक् पार्वती माया बीजं परं येषाम् ।

अब शत्रुओं के द्वारा प्रयुक्त कृत्या (मारण के लिए किये गये प्रयोग विशेष) को नष्ट करने वाली प्रत्यङ्गिरा के विषय में कहता हूँ ॥ ८४ ॥

दीर्घेन्दुयुक् मरुत् (दीर्घ आ, इन्द्र अनुस्वार उससे युक्त मरुत् य्) 'यां', फिर ब्रह्मा (क) लोहित संस्थित मांस (ल्प), फिर 'यन्ति नोऽरयः' यह पद, इसके बाद 'क्रूरां कृत्यां' उच्चारण करना चाहिए । फिर 'वधूमिव' यह पद, फिर 'तां ब्रह्म', उसके बाद सदीर्घ ण (णा), फिर 'अपनिर्णुद्मः' के पश्चात् 'प्रत्यक्कर्त्तारमृच्छतु' इस मन्त्र को तार (ॐ) माया (ह्रीं) से संपुटित करने पर सैंतीस अक्षरों का प्रत्यङ्गिरा मन्त्र निष्पन्न होता है ॥ ८५-८७ ॥

विमर्श - मन्त्र का स्वरूप इस प्रकार है -

'ॐ ह्रीं यां कल्पयन्ति नोरयः क्रूरां कृत्यां वधूमिव तां ब्रह्मणा अपनिर्णुद्मः प्रत्यक्कर्त्तारमृच्छतु ह्रीं ॐ' ॥ ८५-८७ ॥

इस मन्त्र के ब्रह्मा ऋषि हैं, अनुष्टुप् छन्द है, देवी प्रत्यङ्गिरा इसके देवता हैं,

---

१. ॐ ह्रीं यां कल्पयन्ति नोरयः क्रूरां कृत्यां वधूमिव तां ब्रह्मणा अपनिर्णुद्मः प्रत्यक्कर्त्तारमृच्छतु ह्रीं ॐमिति सप्तत्रिंशदक्षरः ।

२. अस्य प्रत्यंगिरामन्त्रस्य ब्रह्माऋषिः अनुष्टुपछन्दः देवीप्रत्यंगिरादेवता ॐ बीजं ह्रीं शक्तिः ममाखिलावाप्तये जपे विनियोगः ।

वसुभिर्मन्त्रजैर्वर्णैर्दीर्घयुक्पार्वतीपरैः ।
प्रणवाद्यैः षडङ्गानि कल्पयेज्जातिसंयुतैः ॥ ८९ ॥
शिरोभ्रूमध्यवक्त्रेषु कण्ठे बाहुद्वये हृदि ।
नाभावूर्वोर्जानुनोश्च पदानि पदयोर्न्यसेत् ॥ ९० ॥
चतुर्दशक्रमान्मन्त्री तारमायापुटान्यपि ॥

प्रणव आद्यो येषाम् । जात यो हृदयाय नम इत्यादयस्तत्संयुतैरष्टादिवर्णैः षडङ्गम् ॥ ८८ ॥ पदन्यासमाह – **शिर** इति । प्रणव मायासम्पुटानि चतुर्दश पदानि शिर आदिषु न्यसेत् । तेषां वर्णसंख्या क्रमात् । एकचतुरेक त्रि द्वि द्वि द्वि द्वि एक त्रि पञ्च द्वि त्रि त्रिः वर्णैर्बोध्या । ॐ ह्रीं यां ह्रीं शिरसीत्यादि ॥ ८९–९० ॥

प्रणव बीज है, माया (ह्रीं) शक्ति है, पर कृत्या (शत्रु द्वारा प्रयुक्त मारण रूप विशेष अभिचार) के विनाश के लिए इसका विनियोग है ॥ ८७-८८ ॥

विमर्श – विनियोग – 'अस्य श्रीप्रत्यङ्गिरामन्त्रस्य ब्रह्माऋषिरनुष्टुप्छन्दः देवी प्रत्यङ्गिरा देवता ॐ बीजं ह्रीं शक्तिः परकृत्या निवारणे विनियोगः' ॥ ८७-८८ ॥

अब उक्त **मन्त्र का न्यास** कहते हैं –

मन्त्र के ८, तोयनिधि ४, युग ४, वेद ४ फिर ५ फिर वसु (८) अक्षरों से प्रारम्भ में प्रणव एवं अन्त में ६ दीर्घयुक्त पार्वती (माया ह्रीं) लगाकर जाति (हृदयाय नमः) आदि षडङ्गन्यास करना चाहिए ॥ ८८-८९ ॥

अब **मन्त्र का पदन्यास** कहते हैं –

साधक तार (ॐ) तथा माया से संपुटित मन्त्र के चौदह पदों का शिर, भ्रूमध्य, मुख, कण्ठ, दोनों बाहु, हृदय, नाभि, दोनो ऊरू, दोनों जानु तथा दोनों पैरों में इस प्रकार कुल चौदह स्थानों में क्रमपूर्वक उक्त न्यास करे ॥ ८९-९० ॥

विमर्श – षडङ्गन्यास इस प्रकार करे । यथा –

ॐ यां कल्पयन्ति नोरयः ह्रां हृदयाय नमः, ॐ क्रूरां कृत्यां ह्रीं शिरसे स्वाहा,
ॐ वधूमिव ह्रूं शिखायै वषट्, ॐ तां ब्रह्मणा ह्रैं कवचाय हुम्,
ॐ अपनिर्णुद्मः ह्रौं नेत्रत्रयाय वौषट्, ॐ प्रत्यक्कर्त्तारमृच्छतु ह्रः अस्त्राय फट् ।

मन्त्र का **पदन्यास** इस प्रकार करे –

ॐ ह्रीं यां ह्रीं शिरसि, ॐ ह्रीं कल्पयन्ति ह्रीं भ्रूमध्ये,
ॐ ह्रीं नो ह्रीं मुखे, ॐ ह्रीं अरयः ह्रीं कण्ठे,
ॐ ह्रीं क्रूरां ह्रीं दक्षिण वाहौ, ॐ ह्रीं कृत्यां ह्रीं वामबाहौ,
ॐ ह्रीं वधूम् ह्रीं हृदि, ॐ ह्रीं इव ह्रीं नाभौ,
ॐ ह्रीं तां ह्रीं दक्षिण उरौ, ॐ ह्रीं ब्रह्मणा ह्रीं वाम उरौ,
ॐ ह्रीं अपनिर्णुद्मः ह्रीं दक्षिणजानौ, ॐ ह्रीं प्रत्यक् ह्रीं वामजानौ,
ॐ ह्रीं कर्त्तारम् ह्रीं दक्षिणपादे ॐ ह्रीं ऋच्छतु ह्रीं वामपादे॥ ८८-९० ॥

ध्यानप्रयोगादिकथनम्

आशाम्बरा मुक्तकचा घनच्छवि
र्ध्येया सचर्मासिकराहिभूषणा ।
दंष्ट्रोग्रवक्त्राग्रसिताहितान्वया
प्रत्यङ्गिरा शङ्करतेजसेरिता ॥ ६१ ॥
ध्यायन्नेवं जपेन्मन्त्रमयुतं तद्दशांशतः ।
अपामार्गेध्मराज्याज्यहविर्भिर्जुहुयात्ततः ॥ ६२ ॥
अन्नपूर्णासने चार्चेदङ्गलोकेश्वरायुधः ।
एवं सिद्धमनुर्मन्त्री प्रयोगेषु शतं जपेत् ॥ ६३ ॥
जुहुयाच्च शतं दिक्षु दशमन्त्रैर्हरेद् बलिम् ।

बलिमन्त्रपूर्वकं बलिदानम्

यो मे पूर्वगतः पाप्मा पापकेनेह कर्मणा ॥ ६४ ॥

ध्यानमाह – **आशेति** । आशाम्बरा नग्ना । घनच्छविर्मेघश्यामा । ग्रसितो-ऽहितानां रिपूणामन्वयो वंशो यया । असिर्दक्षिणे ॥ ६१–६३ ॥ बलिमन्त्रमाह – **योम** इति । ॐ यो मे पूर्वगतः पाप्मा पापकेनेह कर्मणा । इन्द्रस्तं देवराजो भञ्जयतु अञ्जयतु मोहयतु नाशयतु मारयतु कलिं तस्मै प्रयच्छतु कृतं मम शिवं मम शान्तिः स्वस्त्ययनं चास्तु । इति बलिमन्त्रः । अनेन प्राच्यां बलिं दद्यात् ॥ ६४–६७ ॥

अब **महेश्वरी का ध्यान** कहते हैं - जिस दिगम्बरा देवी के केश छितराये हैं, ऐसी मेघ के समान श्याम वर्ण वाली, हाथों में खड्ग और चर्म धारण किये, गले में सर्पो की माला धारण किये, भयानक दाँतों से अत्यन्त उग्रमुख वाली, शत्रु समूहों को कवलित करने वाली, शंकर के तेज से प्रदीप्त, प्रत्यङ्गिरा का ध्यान करना चाहिए ॥ ६१ ॥

इस प्रकार मन्त्र का ध्यान करते हुये दश हजार मन्त्रों का जप करे तथा अपामार्ग (चिचिहड़ी) की लकड़ी, घृत मिश्रित राजी (राई) से उनका दशांश होम करे ॥ ६२ ॥

अन्नपूर्णा पीठ पर अङ्गपूजा लोकपाल एवं उनके आयुधों की पूजा करनी चाहिए । इस प्रकार सिद्ध मन्त्र का काम्य प्रयोगों में १०० बार जप करे । फिर उतनी ही संख्या में होम भी करे । तदनन्तर वक्ष्यमाण दश मन्त्रों से दशो दिशाओं में बलि देवे ॥ ६३-६४ ॥

विमर्श - प्रयोगविधि - (६. ६) श्लोक में बतलाई गई विधि से पीठ देवता एवं पीठशक्तियों की पूजा कर पीठ पर देवी की पूजा करे । फिर उनकी अनुज्ञा लेकर इस प्रकार आवरण पूजा करे । कर्णिका में षडङ्गपूजा (द्र० ६. ६०) फिर अन्नपूर्णा के षष्ठ एवं सप्तम आवरण में बतलाई गई विधि से इन्द्रादि लोकपालों एवं उनके आयुधों की पूजा करे । (द्र० ६. २१) ॥ ६३-६४ ॥

इन्द्रस्तंदेव उच्चार्य राजान्ते भञ्जयत्विति ।
अञ्जयत्वितिचोच्चार्य मोहयत्विति चोच्चरेत् ॥ ६५ ॥
नाशयतुपदं पश्चान्मारयत्वित्यतो बलिम् ।
तस्मै प्रयच्छतु कृतंममान्ते च शिवं मम ॥ ६६ ॥
शान्तिः स्वस्त्ययनं चास्तु बलिमन्त्र उदाहृतः ।
प्रणवाद्योऽष्टषष्ट्यर्णस्तेनैव वितरेद् बलिम् ॥ ६७ ॥

दिक्षुबलिदानप्रकारकथनम्

अस्मिन्मन्त्रे पूर्वपदस्थानेग्न्यादिपदं वदेत् ।
अग्निरित्यादि च पठेदिन्द्र इत्यादिके स्थले ॥ ६८ ॥
एवं तु दशमन्त्राः स्युस्तैस्तत्तद् दिग्बलिं हरेत् ।
इत्थं कृते शत्रुकृता कृत्या क्षिप्रं विनश्यति ॥ ६९ ॥

अस्मिन्मन्त्रे । पूर्वेत्यस्य स्थाने अग्न्यादिपदम् । इन्द्र इत्यस्य स्थाने अग्निरित्यादि । देवराज इत्यत्र तेजो राज इत्यादि ऊहान् कृत्वा दशमन्त्रा विधेयास्तैस्तस्यां तस्यां दिशि बलिं दद्यात् । यथा – यो मेऽग्निगतः पाप्मा पापकेनेह कर्मणा अग्निस्तं तेजो राजो भञ्जयत्वित्यादि० यो मे दक्षिणगतः यमस्तं प्रेतराज इत्यादि ॥ ६८–६९ ॥

पूर्व दिशा में 'यो मे पूर्वगतः पाप्मा पापकेनेह कर्मणा इन्द्रस्तं देव' इतना कहकर 'राजो' फिर 'अन्त्रयतु' फिर 'अञ्जयुत' कह कर 'मोहयतु' ऐसा कहें, फिर 'नाशयतु', 'मारयतु', 'बलिं तस्मै प्रयच्छतु', इसके बाद 'कृतं मम', 'शिवं मम' फिर 'शान्तिः स्वस्त्ययनं चास्तु' कहने से बलि मन्त्र बन जाता है । आदि में प्रणव लगाकर अड़सठ अक्षरों से बलि प्रदान करना चाहिए ॥ ६४-६७ ॥

तत्पश्चात् बलि देने के समय इस मन्त्र में पूर्व के स्थान में आग्नेये आदि दिशाओं का नाम बदलते रहना चाहिए, और इन्द्र के स्थान में अग्नि इत्यादि दिक्पालों के नाम भी बदलते रहना चाहिए । इस प्रकार करने से शत्रु द्वारा की गई 'कृत्या' शीघ्र नष्ट हो जाती है ॥ ६८-६९ ॥

विमर्श – बलि मन्त्र का स्वरूप इस प्रकार है – 'ॐ यो मे पूर्वगतः पाप्मापाकेनेह कर्मणा इन्द्रस्तं देवराजो भञ्जयतु, अञ्जयतु, मोहयतु, नाशयतु मारयतु बलिं तस्मै प्रयच्छतु कृतं मम शिवं मम शान्तिः स्वस्त्ययनं चास्तु ' यह अड़सठ अक्षर का बलिदान मन्त्र है ।

दशो दिशाओं में बलिदान का प्रकार –

यो मे पूर्वगतः पाप्मा पापकेनेह कर्मणा इन्द्रस्तं देवराजो भञ्जयतु इत्यादि
यो मे आग्नेयगतः पाप्मा पापकेनेह कर्मणा अग्निस्तं तेजोराजो भञ्जयतु इत्यादि
यो मे दक्षिणगतः पाप्मा पापकेनेह कर्मणा यमस्तं प्रेतराजो भञ्जयतु इत्यादि

प्रत्यङ्गिरामालामन्त्रः

अथ प्रत्यंगिरामालामन्त्रसिद्धिः प्रकीर्त्यते ।
तारो मायानभः कृष्णवाससेशतवर्णकाः ॥ १०० ॥
सहस्रहिंसिनिपदं सहस्रवदने पुनः ।
महाबलेपदंपश्चादुच्चरेदपराजिते ॥ १०१ ॥
प्रत्यङ्गिरे परसैन्यपरकर्मसदृग्जलम् ।
ध्वंसिनि परमन्त्रोत्सादिनि सर्वपदं ततः ॥ १०२ ॥
भूतान्ते दमनिप्रान्ते सर्वदेवान् समुच्चरेत् ।
बन्धयुग्मं सर्वविद्याश्छिन्धियुक्क्षोभयद्वयम् ॥ १०३ ॥
परयन्त्राणि संकीर्त्य स्फोटयद्वितयं पठेत् ।
सर्वान्ते शृंखला उक्त्वा त्रोटयद्वितयं ज्वलत् ॥ १०४ ॥
ज्वालाजिह्वेकरालान्ते वदने प्रत्यमुच्चरेत् ।
गिरे मायानमोन्तोऽयं शरसूर्याक्षरो मनुः ॥ १०५ ॥

प्रत्यङ्गिरामालामन्त्रमाह – **तार** इति । तारः प्रणवः । माया ह्रीं। सदृक् जलम्। इयुतो वः वि ॥ १००–१०४ ॥ शर सूर्य्याक्षरः । पञ्चविंशत्यधिकशतार्णः। ॐ ह्रीं नमः – कृष्णवाससे शतसहस्रहिंसिनि सहस्रवदने महाबले अपराजिते प्रत्यङ्गिरे परसैन्यपरकर्मविध्वंसिनि परमन्त्रोत्सादिनि सर्वभूतदमनि सर्वदेवान् बन्ध बन्ध सर्वविद्याश्छिन्धि छिन्धि क्षोभय क्षोभय परयन्त्राणि स्फोटय स्फोटय सर्वशृंङ्खलास्त्रोटय त्रोटय ज्वलज्ज्वालाजिह्वे करालवदने प्रत्यङ्गिरे ह्रीं नम इति ॥ १०५–१०६ ॥

यो मे नैर्ऋत्यगतः पाप्मा पापकेनेह कर्मणा निर्ऋतिस्तं रक्षराजो भञ्जयतु इत्यादि
यो मे पश्चिमगतः पाप्मा पापकेनेह कर्मणा वरुणस्तं जलराजो भञ्जयतु इत्यादि
यो मे वायव्यगतः पाप्मा पापकेनेह कर्मणा वायुस्तं प्राणराजो भञ्जयतु इत्यादि
यो मे उत्तरगतः पाप्मा पापकेनेह कर्मणा सोमस्तं नक्षत्रराजो भञ्जयतु इत्यादि
यो मे ईशानगतः पाप्मा पापकेनेह कर्मणा ईशानस्तं गणराजो भञ्जयतु इत्यादि
यो मे ऊर्ध्वगतः पाप्मा पापकेनेह कर्मणा ब्रह्मा तं प्रजाराजो भञ्जयतु इत्यादि
यो मे अधोगतः पाप्मा पापकेनेह कर्मणा अनन्तस्तं नागराजो भञ्जयतु इत्यादि ॥ ६८-६६ ॥

अब **प्रत्यङ्गिरामाला मन्त्र का उद्धार** बतलाते हैं -

तार (ॐ), माया (ह्रीं), फिर 'नमः कृष्णवाससे शत वर्ण' फिर 'सहस्र हिंसिनि' पद, फिर 'सहस्रवदने', पुनः 'महाबले', फिर 'अपराजिते', फिर 'प्रत्यङ्गिरे', फिर 'परसैन्य परकर्म', फिर सदृक् जल (वि), फिर 'ध्वंसिनि परमन्त्रोत्सादिनि सर्व' पद, फिर उसके अन्त में 'भूत' पद, फिर 'दमनि', फिर 'सर्वदेवान्', फिर 'बन्ध' युग्म (बन्ध बन्ध),

ऋष्यादिकं पूर्वमुक्तं माययास्यात्षडङ्गकम्।
ध्यायेत्प्रत्यंगिरां देवीं सर्वशत्रुविनाशिनीम्॥ १०६॥

ध्यानजपादिमन्त्रसिद्धिकथनम्

सिंहारूढातिकृष्णं त्रिभुवनभयकृद्रूपमुग्रं वहन्ती,
ज्वालावक्त्रावसानानववसनयुगं नीलमण्याभकान्तिः।
शूलं खड्गं वहन्ती निजकरयुगले भक्तरक्षैकदक्षा,
सेयं प्रत्यङ्गिरा संक्षपयतु रिपुभिर्निर्मितं वोभिचारम्॥ १०७॥

ध्यानमाह – **सिंहेति** । खड्गो दक्षिणे॥ १०७–१०६॥

फिर 'सर्वविद्याः', फिर 'छिन्धि' युग्म (छिन्धि, छिंन्धि), फिर 'क्षोभय' युग्म (क्षोभय क्षोभय), फिर 'परमन्त्राणि' के बाद 'स्फोटय' युग्म् (स्फोटय स्फोटय), फिर 'सर्वशृङ्खलां' के बाद 'त्रोटय' युग्म (त्रोटय त्रोटय), फिर 'ज्वलज्ज्वाला जिह्वे करालवदने प्रत्यङ्गिरे' फिर माया (ह्रीं), तथा अन्त में 'नमः' लगाने से १२५ अक्षरों का प्रत्यंगिरा माला मन्त्र बनता है॥ १००-१०५॥

विमर्श – प्रत्यङ्गगिरा माला मन्त्र का स्वरूप इस प्रकार है –

'ॐ ह्रीं नमः कृष्ण वाससे शतसहस्रहिंसिनि सहस्रवदने महाबले अपराजिते प्रत्यङ्गिरे परसैन्य परकर्मविध्वंसिनि परमन्त्रोत्सादिनि सर्वभूतदमनि सर्वदेवान् बन्ध बन्ध सर्वविद्याश्छिन्धि छिन्धि क्षोभय क्षोभय परयन्त्राणि स्फोटय स्फोटय सर्वशृङ्खलास्त्रोटय त्रोटय ज्वलज्ज्वालाजिह्वे करालवदने प्रत्यङ्गिरे ह्रीं नमः'॥ १००-१०५॥

इस मन्त्र के ऋषि छन्द तथा देवता पूर्व में कह आये हैं । इस मन्त्र के माया बीज से षडङ्गन्यास करना चाहिए । तदनन्तर समस्त शत्रुओं को नाश करने वाली प्रत्यङ्गिरा का ध्यान करना चाहिए॥ १०६॥

विमर्श – विनियोग – 'अस्य श्रीप्रत्यङ्गिरामन्त्रस्य ब्रह्माऋषिरनुष्टुप्छन्दः प्रत्यङ्गिरादेवता ॐ बीजं ह्रीं शक्तिः ममाभीष्टसिद्ध्यर्थे (परकृत्यनिवारणे वा) जपे विनियोगः ।

षडङ्गन्यास – ॐ ह्रां हृदयाय नमः, ॐ ह्रीं शिरसे स्वाहा,
ॐ ह्रूं शिखायै वषट्, ॐ ह्रैं कवचाय हुम्,
ॐ ह्रौं नेत्रत्रयाय वौषट्, ॐ ह्रः अस्त्राय फट्॥ १०६॥

सिंहारूढ़, अत्यन्त कृष्णवर्णा, त्रिभुवन को भयभीत करने वाले रूपकों को धारण करने वाली, मुख से आग की ज्वाला उगलती हुई, नवीन दो वस्त्रों को धारण किये हुये, नीलमणि की आभा के समान कान्ति वाली, अपने दोनों हाथों में शूल तथा खड्ग धारण करने वाली, स्वभक्तों की रक्षा में अत्यन्त सावधान रहने वाली, ऐसी प्रत्यङ्गिरा देवी हमारे शत्रुओं के द्वारा किये गये अभिचारों को विनष्ट करे॥ १०७॥

अयुतं प्रजपेन्मन्त्रं सहस्रं तिजराजिकाः ।
हुत्वा सिद्धमनुं मन्त्रं प्रयोगेषु शतं जपेत् ॥ १०८ ॥
ग्रहभूतादिकाविष्टं सिञ्चेन्मन्त्रं जपञ्जलैः ।
विनाशयेत्परकृतं यन्त्रमन्त्रादिकर्मणाम् ॥ १०६ ॥

शत्रुनाशकमन्त्रः

मन्त्रं विरोधिशमकं प्रवक्ष्ये षोडशाक्षरम् ।
प्रणवः केशवः सेन्दुर्वर्गाद्याः पञ्चसेन्दवः ॥ ११० ॥
वियच्चन्द्रान्वितं रान्तसद्योजातः शशांकयुक् ।
मायात्रिकर्णचन्द्राढ्यो भृगुः सर्गी सवर्मफट् ॥ १११ ॥
स्वाहान्तः षोडशार्णोऽयं मन्त्रः[1] शत्रुविनाशनः ।
विधाताष्टिर्ऋषिश्छन्दः[2] पर्वताब्ध्यग्निवायवः ॥ ११२ ॥

शत्रुनाशकमन्त्रमाह – **प्रणव** इति । प्रणवः ॐ । सेन्दुः केशवः । अं । सेन्दवः पञ्चवर्गाद्याः कं चं टं तं पं ॥ ११० ॥ चन्द्रान्वितं वियत् हं । रान्तं लः । सद्योजातः शशांको बिन्दुस्ताभ्यां युक्तः लों । माया ह्रीं । कर्णचन्द्राढ्यः उ । बिन्दुयुतोऽत्रि दुं । सर्गी भृगुः सः वर्म हुं ॥ १११ ॥ फट् स्वाहा स्वरूपम् । विधाता ब्रह्मा । महापूर्वाः पर्वतादयः । महापर्वतमहासमुद्र महाग्नि महावायुमहापृथ्वी

इस मन्त्र का दश हजार जप करना चाहिए तथा तिल एवं राई का होम एक हजार की संख्या में निष्पन्न कर मन्त्र सिद्ध करना चाहिए । फिर काम्य प्रयोगों में मात्र १०० की संख्या में जप करना चाहिए ॥ १०८ ॥

ग्रह बाधा, भूत बाधा आदि किसी प्रकार की बाधा होने पर इस मन्त्र का जप करते हुए जल से रोगी को अभिसिञ्चित करना चाहिए । इसी प्रकार शत्रुद्वारा यन्त्र मन्त्रादि द्वारा अभिचार भी विनिष्ट करना चाहिए ॥ १०६ ॥

अब **षोडशाक्षर वाला शत्रुविनाशक मन्त्र** बतलाता हूँ -

प्रणव (ॐ), सेन्दु केशव (अं), सेन्दु पञ्चवर्गों के आदि अक्षर (कं चं टं तं पं), चन्द्रान्वित वियत् (हं), सद्योजात (ओ), शशांक (अनुस्वार), उससे युक्त रान्त (ल), इस प्रकार (लों), माया (ह्रीं), कर्ण (उकार), चन्द्र (अनुस्वार), इससे युक्त अत्रि (द्) (अर्थात् दुं), सर्गी (विसर्गयुक्त), भृगु (स), इस प्रकार (सः), वर्म (हुं), फिर 'फट्' इसके अन्त में 'स्वाहा' लगाने से उक्त मन्त्र निष्पन्न होता है ॥ ११०-११२ ॥

---

१. ॐ अं कं चं टं तं प हलों ह्रीं दु सः हु फट् स्वाहेति षोडशार्णः ।

२. अस्य मन्त्रस्य ब्रह्माऋषिः अष्टिछन्दः महापर्वतमहाब्धिमहाग्निमहावायुमहाधरामहामाशः षड्देवता हुंबीजं ह्रीं शक्तिः ममाभीष्टसिद्ध्यर्थे जपे विनियोगः ।

धराकाशौ महापूर्वा देवताः परिकीर्तिताः ।
हुंबीजं पार्वतीशक्तिर्मायया तु षडङ्गकम् ॥ ११३ ॥

षडङ्गक्रमेण ध्यानवर्णनम्

नानारत्नार्चिराक्रान्तं वृक्षाम्भः स्रवर्णैर्युतम् ।
व्याघ्रादिपशुभिर्व्याप्तं सानुयुक्तं गिरिं स्मरेत् ॥ ११४ ॥
मत्स्यकूर्मादिबीजाढ्यं नवरत्नसमन्वितम् ।
घनच्छायं सकल्लोलमकूपारं विचिन्तयेत् ॥ ११५ ॥
ज्वालावतीसमाक्रान्त जगत्त्रितयमद्भुतम् ।
पीतवर्णं महावह्निं संस्मरेच्छत्रुशान्तये ॥ ११६ ॥
धरासमुत्थरेण्वौघमलिनं रुद्धभूदिवम् ।
पवनं संस्मरेद्विश्वजीवनं प्राणरूपतः ॥ ११७ ॥

महाकाशाः षड्देवताः । पार्वती ह्रीं । मायया दीर्घाढ्यया षडङ्गम् ॥ ११२–११३ ॥ षडङ्गक्रमेण ध्यानान्याह – **नानेति** ॥ ११४ ॥ अकूपारं समुद्रम् ॥ ११५–११६ ॥ प्राणरूपेण विश्वं जीवयतीति विश्वजीवनम् ॥ ११७–१२० ॥

विमर्श – मन्त्र का स्वरूप इस प्रकार है – 'ॐ अं कं चं टं तं पं हं लों ह्रीं दुं सः हुं फट् स्वाहा' ॥ ११०-१११ ॥

इस मन्त्र के विधाता ऋषि हैं, अष्टि छन्द हैं १, २, ३, ४, ५, ६, ७, ८, ९, ११ महाअग्नि, महापर्वत, महासमुद्र, महावायु, महाधरा तथा महाकाश देवता कहे गये हैं, हुं बीज है, पार्वती (ह्रीं) शक्ति है । षड्दीर्घ सहित माया बीज से इसके षडङ्गन्यास का विधान कहा गया है ॥ ११२-११३ ॥

विमर्श – विनियोग – 'अस्य विरोधिशामकमन्त्रस्य ब्रह्माऋषिरष्टिच्छन्दः महापार्वताब्ध्याग्निवायुधराकाश देवताः हुं बीजं ह्रीं शक्तिः शत्रुशमनार्थ जपे विनियोगः' ।

षडङ्गन्यास – ॐ ह्रां हृदयाय नमः, ॐ ह्रीं शिरसे स्वाहा,
ॐ ह्रूं शिखायै वषट्, ॐ ह्रैं कवचाय हुम्,
ॐ ह्रौं नेत्रत्रयाय वौषट्, ॐ ह्रः अस्त्राय फट् ॥ ११२-११३ ॥

अब उन छः **देवताओं का ध्यान** कहते हैं –

(i) अनेक रत्नों की प्रभा से आक्रान्त वृक्ष झरनों एवं व्याघ्रादि महाभयानक पशुओं से व्याप्त अनेक शिखर युक्त **महापार्वत** का ध्यान कराना चाहिए ॥ ११४ ॥

(ii) मछली एवं कछुआ रूपी बीजों वाला, नव रत्न समन्वित, मेघ के समान कान्तिमान्, कल्लोलों से व्याप्त **महासमुद्र** का स्मरण करना चाहिए ॥ ११५ ॥

(iii) अपने ज्वाला से तीनों लोकों को आक्रान्त करने वाले अद्भुत एवं पीतवर्ण वाले **महाग्नि** का शत्रुनाश के लिए स्मरण करना चाहिए ॥ ११६ ॥

नदीपर्वतवृक्षादिफलिताग्रामसंकुला ।
आधारभूता जगतो ध्येया पृथ्वीह मन्त्रिणा ॥ ११८ ॥
सूर्यादिग्रहनक्षत्रकालचक्रसमन्वितम् ।
निर्मलं गगनं ध्यायेत्प्राणिनामाश्रयप्रदम् ॥ ११६ ॥
एवं षड्देवता ध्यात्वा सहस्राणि तु षोडश ।
जपेन्मन्त्रं दशांशेन षड्द्रव्यैर्होममाचरेत् ॥ १२० ॥
व्रीह्यस्तन्दुलाआज्यं सर्षपाश्च यवास्तिलाः ।
एतैर्हुत्वा यथाभागं पीठे पूर्वोदिते यजेत् ॥ १२१ ॥
अङ्गदिक्पालवज्राद्यैरेवं सिद्धो भवेन्मनुः ।
शत्रूपद्रवमापन्नो युञ्ज्यात्तन्नष्टये मनुम् ॥ १२२ ॥

अस्य मन्त्रस्य प्रयोगकथनम्

अकारं पर्वताकारं धावन्तं शत्रुसम्मुखम् ।
पतनोन्मुखमत्युग्रं प्राच्यां दिशि विचिन्तयेत् ॥ १२३ ॥

यथाभागं सप्तषष्ट्यधिकं शतद्वयं प्रत्येकम् ॥ १२१–१२२ ॥ प्रयोगमाह – **अकारमिति** ॥ १२३–१२४ ॥

(iv) पृथ्वी की उड़ाई गई धूलराशि से द्युलोक एवं भूलोक को मलिन एवं उनकी गति को अवरुद्ध करने वाले प्राण रूप से सारे विश्व को जीवन दान करने वाले **महापवन** का स्मरण करना चाहिए ॥ ११७ ॥

(v) नदी, पर्वत, वृक्षादि, रूप दलों वाली, अनेक प्रकार ग्रामों से व्याप्त समस्त जगत् की आधारभूता **महापृथ्वी** तत्त्व का स्मरण करना चाहिए ॥ ११८ ॥

(vi) सूर्यादि ग्रहों, नक्षत्रों एवं कालचक्र से समन्वित, तथा सारे प्राणियों को अवकाश देने वाले निर्मल **महाआकाश** का ध्यान करना चाहिए ॥ ११६ ॥

इस प्रकार उक्त छः देवताओं का ध्यान कर सोलह हजार की संख्या में उक्त मन्त्र का जप करना चाहिए । तदनन्तर षड्द्रव्यों से दशांश होम करना चाहिए ॥ १२० ॥

१. धान, २. चावल, ३. घी, ४. सरसों, ५. जौ एवं ६. तिल - इन षड्द्रव्यों में प्रत्येक से अपने अपने भाग के अनुसार २६७, २६७ आहुतियाँ देकर पूर्वोक्त पीठ पर इनका पूजन करना चाहिए ॥ १२१ ॥

फिर अङ्गपूजा, दिक्पाल पूजा एवं वज्रादि आयुधों की पूजा करने पर इस मन्त्र की सिद्धि होती है । शत्रु के उपद्रवों से उद्विग्न व्यक्ति को शत्रुनाश के लिए इस मन्त्र का प्रयोग करना चाहिए ॥ १२२ ॥

अकार का ध्यान - पर्वत के समान आकृति वाले शत्रु संमुख दौड़ते हुये एवं उस पर झपटते हुये अकार का पूर्वदिशा में ध्यान करना चाहिए ॥ १२३ ॥

ककारं क्षुब्धकल्लोलं प्लाविताखिलभूतलम्।
समुद्ररूपिणं भीमं प्रतीच्यां दिशि संस्मरेत्॥ १२४॥
वर्णं तदग्रिमं ज्वालासंघव्याप्तनभस्तलम्।
याम्येरब्धजगद्दाहं स्मरेत्प्रलयपावकम्॥ १२५॥
तृतीयवर्गप्रथमं प्रकम्पितजगत्त्रयम्।
युगान्तपवनाकारमुत्तरस्यां दिशि स्मरेत्॥ १२६॥
तुरीयपञ्चमाद्यार्णौ पृथ्वीगगनरूपिणो।
शत्रुवर्गं बाधमानौ चिन्तयेन्नियतात्मवान्॥ १२७॥
तदग्रिमं वर्णयुगं शत्रोर्निःश्वासपद्धतिम्।
निरुन्धानं स्मरेन्मन्त्री विदधद्रिपुमाकुलम्॥ १२८॥
मायादिवर्णत्रितयं शत्रोर्नेत्रश्रुतीमुखम्।
प्रत्येकं तु निरुन्धानं चिन्तयेत्साधकोत्तमः॥ १२९॥
वर्मसंक्षोभितं त्वस्त्रं रिपोराधारदेशतः।
उत्थाप्य वह्निं तद्देहं प्रदहन्समनुस्मरेत्॥ १३०॥

तदग्रिमं चकारं याम्ये दक्षिणस्याम् । रब्ध आरब्धो जगद्दाहो येऽनलंकृतेति वा पाठः ॥ १२५ ॥ तृतीयेति टम् ॥ १२६ ॥ **तुरीयेति** । चतुर्थपञ्चम-वर्गयोरादिमार्णो तंपं ॥ १२७ ॥ तदग्रिमवर्णयुगं द्वयं हं लोमिति ॥ १२८ ॥ मायादिवर्णत्रितयं ह्रीं दुँ स इति ॥ १२९ ॥ वर्मणा हुँकारेण क्षोभितमस्त्रं फट्कारं रिपोराधारादग्निमुत्थाप्य रिपुदहन्तं स्मरेत्॥ १३०॥

समुद्र के समान आकृति वाले अपने तरङ्गों से सारे पृथ्वी मण्डल को बहाते हुये भयङ्कर रूप धारी **ककार** का पश्चिम दिशा में स्मरण करना चाहिए ॥ १२४॥

अपने ज्वाला समूहों से आकाश मण्डल को व्याप्त करते हुए सारे जगत् को जलाने वाले प्रलयाग्नि के समान **चकार** का दक्षिण दिशा में ध्यान करना चाहिए ॥ १२५॥

सारे जगत् को प्रकम्पित करने वाले युगान्त कालीन पवन के समान आकृति वाले तृतीय वर्ग का प्रथमाक्षर **टकार** का उत्तर दिशा में ध्यान करना चाहिए ॥ १२६॥

शत्रुवर्ग को बाधित करने वाले चतुर्थ वर्ग के प्रथमाक्षर **तकार** का पृथ्वी रूप में एवं पञ्चम वर्ग के प्रथमाक्षर **पकार** का गगन रूप में जितेन्द्रिय साधक को ध्यान करना चाहिए ॥ १२७॥

शत्रु की श्वास प्रणाली को अवरुद्ध कर उसे व्याकुल करते हुये आगे के अग्रिम दो वर्णों (हं लों) का ध्यान करना चाहिए ॥ १२८॥

फिर श्रेष्ठ साधक को शत्रु के नेत्र, मुख एवं कानों को अवरुद्ध करने वाले माया आदि तीन वर्णों का (ह्रीं दुं सः) का ध्यान करना चाहिए । फिर वर्म (हुङ्कार) से

एवं वर्णान् स्मरन्मन्त्रं जपेन्मन्त्रीसहस्रकम् ।
मण्डलत्रितयादर्वाङ् मारयत्येव विद्विषम् ॥ १३१ ॥
एवं यः कुरुते कर्मप्राणायामजपादिभिः ।
संशोधयित्वा स्वात्मानं स्वरक्षायै हरिं स्मरेत् ॥ १३२ ॥

॥ इति श्रीमन्महीधरविरचिते मन्त्रमहोदधावन्नपूर्णादि मन्त्रप्रकाशनं नाम नवमस्तरङ्गः ॥ ९ ॥



मण्डलमेकोनपञ्चाशद्दिनानि ॥ १३१ ॥ मारणं कुर्वतः प्रायश्चित्तमाह – एवमिति ॥ १३२ ॥

इति श्रीमन्महीधरविरचितायां मन्त्रमहोदधिव्याख्यायां नौकायाम–न्नपूर्णादिनिरूपणं नाम नवमस्तरङ्गः ॥ ९ ॥



संक्षोभित तथा अस्त्र (फट्) से शत्रु को मूलाधार से उठा कर अग्नि में फेक कर उसके शरीर को जलाते हुये दो अक्षर हुं फट् का ध्यान करना चाहिए ॥ १२६-१३० ॥

इस प्रकार मन्त्र के सब वर्णों का आदि के ॐ कार तथा अन्त में स्वाहा इन तीन वर्णो को छोड़कर (मात्र तेरह वर्णो का) ध्यान करने वाला मालिक एक हजार की संख्या में निरन्तर जप करे तो तीन मण्डलों (उन्चास दिन) के भीतर ही वह अपने शत्रु को मार सकता हैं ॥ १३१ ॥

जिसे शत्रुमारण कर्म करना हो उस साधक को प्राणायाम तथा इष्टदेवता के मन्त्र के जप से नित्य आत्मशुद्धि कर लेनी चाहिए तथा अपनी रक्षा के लिए भगवान् विष्णु का स्मरण करते रहना चाहिए ॥ १३२ ॥

॥ इस प्रकार श्रीमन्महीधर विरचित मन्त्रमहोदधि के नवम तरङ्ग की महाकवि पं० रामकुबेर मालवीय के द्वितीय आत्मज डॉ० सुधाकर मालवीय कृत 'अरित्र' नामक हिन्दी व्याख्या पूर्ण हुई ॥ ९ ॥



अथ दशमः तरङ्गः

अथ प्रवक्ष्ये शत्रूणां स्तम्भिनी बगलामुखी।

बगलामुखीमन्त्रः

प्रणवो गगनं पृथ्वीशान्तिबिन्दुयुतं बग ॥ १ ॥
लामुखाक्षो गदीसर्वं दुष्टानां वाहलीन्दुयुक्।
मुखंपदं स्तम्भयान्ते जिह्वां कीलय वर्णकाः ॥ २ ॥
बुद्धिं विनाशायान्ते तु बीजं तारोऽग्निसुन्दरी।
षट्[१]त्रिंशदक्षरो मन्त्रो नारदो मुनिरस्य तु ॥ ३ ॥

---

* नौका *

बगलामुखीमाह – **प्रणव** इति । गगनं हः । पृथ्वी लः । शान्तिः ई । बिन्दुश्च तैर्युतं ह्रीं । बगलामुखी स्वरूपम् । गदी खः । साक्ष इयुतः खि । 'सर्व–दुष्टानां वा' स्वरूपम् । इन्दुयुक् हली चं । मुखं पदमित्यादि स्वरूपम् । बीजं ह्रीं । तार ॐ अग्निसुन्दरी स्वाहा ॥ १–३ ॥

---

* अरित्र *

अब शत्रुओं के मुख पीठ जिह्वा आदि का स्तम्भन करने वाले **बगलामुखी का मन्त्र** बतलाता हूँ ।

प्रणव (ॐ), शान्ति (ई) एवं बिन्दु (अनुस्वार), के सहित गगन (ह्), अर्थात् (ह्रीं), फिर 'बगलामु', फिर साक्ष इकार युक्त गदी (ख) अर्थात् (खि), फिर 'सर्वदुष्टानां वा', फिर इन्दु (अनुस्वार) युक् हली (च) अर्थात् (चं), फिर 'मुखं पदं स्तम्भय' के बाद 'जिह्वां कीलय बुद्धिं विनाशय', फिर बीज (ह्रीं), तार (ॐ), फिर अग्निसुन्दरी (स्वाहा) लगाने से छत्तिस अक्षरों का मन्त्र निष्पन्न होता है ॥ १-३ ॥

विमर्श - इस **मन्त्र का स्वरूप** इस प्रकार है - 'ॐ ह्रीं बगलामुखि सर्वदुष्टानां वाचं मुखं पदं स्तम्भय जिह्वां कीलय बुद्धिं विनाशय ह्रीं ॐ स्वाहा' ॥ १-३ ॥

इस मन्त्र के नारद ऋषि हैं, बृहती छन्द है, बगलामुखी देवता हैं, मन्त्र के

---

१. ॐ ह्रीं बगलामुखि सर्वदुष्टानां वाचं मुखं पदं स्तंभय जिह्वां कीलय बुद्धिं विनाशय ह्रीं ॐस्वाहेति षट्त्रिंशदर्णः ।

छन्दोऽपिबृहती ज्ञेयं देवताबगलामुखी ।
नेत्राक्षसायकनवपञ्चकाष्ठाभिरङ्गकम् ॥ ४ ॥

ध्यानजपादिविधानम्

सौवर्णासनसंस्थितां त्रिनयनां पीतांशुकोल्लासिनीं
हेमाभाङ्गरुचिं शशाङ्कमुकुटां सच्चम्पकस्रग्युताम् ।
हस्तैर्मुद्गरपाश वज्ररसनाः सम्बिभ्रतीं भूषणै
र्व्याप्ताङ्गीं बगलामुखीं त्रिजगतां संस्तम्भिनीं चिन्तयेत् ॥ ५ ॥
एवं ध्यात्वा जपेल्लक्षमयुतं चम्पकोद्भवैः ।
कुसुमैर्जुहुयात् पीठे पूर्वोक्ते पूजयेदिमाम् ॥ ६ ॥
चन्दनागुरुचन्द्राद्यैः पूजार्थं यन्त्रमालिखेत् ।
त्रिकोणषड्दलाष्टास्रषोडशारधरापुरम् ॥ ७ ॥

षडङ्गमाह – **नेत्रेति** । अक्षाणि पञ्च ॥ ४ ॥ ध्यानमाह – **सौवर्णेति** । मुद्गरवज्रौ दक्षयोः । पाशरिपुजिह्वे वामयोः ॥ ५ ॥ * ॥ ६–८ ॥

२, ५, ५, ६, ५, एवं १० अक्षरों से षडङ्गन्यास करना चाहिए ॥ ३-४ ॥

विमर्श - विनियोग - 'ॐ अस्य श्रीबगलामुखीमन्त्रस्य नारदऋषिः बृहतीछन्दः बगलामुखीदेवता शत्रूणां स्तम्भनार्थे जपे विनियोगः' ।

षडङ्गन्यास - ॐ ह्लीं हृदयाय नमः, ॐ बगलामुखि शिरसे स्वाहा,
ॐ सर्वदुष्टानां शिखायै वषट्, ॐ वाचं मुखं पदं स्तम्भय कवचाय हुम्
ॐ जिह्वां कीलय नेत्रत्रयाय वौषट्,
ॐ बुद्धिं विनाशय ह्लीं, ॐ स्वाहा अस्त्राय फट् ॥ ३-४ ॥

अब **बगलामुखी देवी का ध्यान** कहते हैं -

सुवर्ण निर्मित सिंहासन पर विराजमान, तीन नेत्रों वाली पीत वस्त्र से उदीप्त सुवर्ण के समान आभा वाली, चन्द्रकला युक्त मुकुट धारण की हुई, चम्पक की माला पहने हुये, अपने हाथों में मुद्गर, पाश, वज्र एवं शत्रु की जीभ लिए हुये, अपने समस्त अङ्गों में भूषण धारण किये हुये, तीनों लोकों को स्तम्भित करने वाली बगलामुखी का ध्यान करना चाहिए ॥ ५ ॥

इस प्रकार ध्यान कर उक्त मन्त्र का एक लाख जप करना चाहिए । चम्पा के फूलों से दश हजार आहुतियाँ देनी चाहिए, तथा पूर्वोक्त पीठ पर इनका पूजन करना चाहिए । (द्र० ६.६) ॥ ६ ॥

अब **बगलामुखी का पूजन यन्त्र** कहते हैं - त्रिकोण, षड्दल, अष्टदल, षोडशदल एवं भूपुर से संयुक्त पूजायन्त्र को चन्दन, अगरु, कपूर आदि अष्टगन्ध

मध्ये सम्पूजयेद् देवीं कोणे सत्त्वादिकान्गुणान् ।
षट्कोणेषु षडङ्गानि मातृभैरवसंयुता ॥ ८ ॥
सम्पूज्याऽष्टदले पद्मे षोडशारे यजेदिमाः ।

अष्टषोडशपीठदेवताकथनम्


मङ्गलास्तम्भिनी चैव जृम्भिणीमोहिनी तथा ॥ ६ ॥
वश्याचलाबलाका च भूधराकल्मषाभिधा ।
धात्री च कलनाकालकर्षिणीभ्रामिकाऽपि च ॥ १० ॥
मन्दगमना च भोगस्था भाविका षोडशी स्मृता ।
भूगृहस्य चतुर्दिक्षु पूर्वादिषु यजेत् क्रमात् ॥ ११ ॥
गणेशं बटुकं चापि योगिनीं क्षेत्रपालकम् ।
इन्द्रादींश्च ततो बाह्ये निजायुधसमन्वितान् ॥ १२ ॥
इत्थं सिद्धमनुर्मन्त्री स्तम्भयेद् देवतादिकान् ।

भैरवसंयुतामातृरष्टदले सम्पूज्य षोडशदले इमा मङ्गलाद्या यजेत् ॥ ६–१२ ॥ * ॥ १३–१७ ॥

के द्रव्यों से निर्माण करना चाहिए ॥ ७ ॥

अब **यन्त्र पूजा की विधि** कहते हैं - **मध्य में** देवी की पूजा तथा **त्रिकोण में** सत्त्व, रज, तम आदि तीनों गुणों की, **षट्कोण में** षडङ्गपूजा तथा **अष्टदल में** भैरवों के साथ मातृकाओं का पूजन करना चाहिए ॥ ८ ॥

बगलामुखीपूजनयन्त्रम्



सोलह दल में १. मङ्गला, २. स्तम्भिनी, ३. जृम्भिणी, ४. मोहिनी, ५. वश्या, ६. चला, ७. बलाका, ८. भूधरा, ६. कल्मषा, १०. धात्री, ११. कलना, १२. कालकर्षिणी, १३. भ्रामिका, १४. मन्दगमना, १५. भोगस्था एवं १६. भाविका - इन सोलह शक्तियों की पूजा करनी चाहिए ॥ ६–११ ॥

